[illegible]

1

१ ॥श्रीगणेशायनमः॥ जयतिजगतःप्रसूतिर्विश्वात्मासहजभूषणंनभसः द्रुतकनकस
२ शदृश दृशदशशतमयूखमालार्चितःसविता १ प्रथममुनिकथितमवितथमालोक्यग्रंथविस्तरस्या
र्थंनातिलघुविपुलरचनाभिरुद्यतःस्पष्टमभिधातुं २ मुनिविरचितमिदमितियच्चि
रंतनंसाधुनमनुजग्रथितं तुल्येर्थेक्षरभेदादमंत्रकेकाविशेषोक्तिः ३ क्षितितनयदि
वसवारेनशुभकृदितियदिपितामहप्रोक्तं कुजदिनमनिष्टमितिवाकोत्रविशेषोनृ
दिव्यकृते ४ आब्रह्मादिविनिसृतमालोक्यग्रंथविस्तरंक्रमशः क्रियमाणमेवैतत्समा क ६
तो ५ सतोममोत्साहः ५ आसीत्तमःकिलेदंतत्रापांतैजसेभवद्धैमे स्वर्भूशकलेब्रह्माविश्व
कृदंडेर्कशशिनयनः ६ कपिलःप्रधानमाहद्रव्यादीन्कणभुगस्यविश्वस्यकालं
कारणमेकेस्वभावमपरेजगुःकर्म ७ तदलमतिविस्तरेणप्रसंगवादार्थनिर्णयोति
महान् ज्योतिःशास्त्रांगानांवक्तव्योनिर्णयोत्रमया ८ ज्योतिःशास्त्रमनेकभेदविषयं
स्कंधत्रयाधिष्ठितंतत्कार्त्स्न्योपनयस्यनाममुनिभिःसंकीर्त्यतेसंहितास्कंधेस्मिन्गणिते

२

नो शांतिकपौष्टिकपराभिचारस्नानविद्याभिज्ञो विबुधार्चनव्रतोपवासनिरतः स्व
तंत्राश्चर्योत्पादितप्रभावः पृष्टाभिधाय्यन्यत्र दैवात्ययात् ग्रहगणितसंहिताहोरा
ग्रंथार्थस्य च वेत्ता तत्र ग्रहगणिते पौलिशरोमकवासिष्ठसौरपैतामहेषु पंचसु सि
द्धांतेषु युगवर्षायनर्तुमासपक्षाहोरात्रयाममुहूर्त्तनाडीविनाडीप्राणत्रुटिप्रभृत्यवयव
स्य कालस्य क्षेत्रस्य च वेत्ता चतुर्णां मासानां सौरसावननाक्षत्रचांद्राणामधिमासकाव
मसंभवस्य च कारणाभिज्ञः षष्ट्यब्दयुगवर्षमासदिनहोराधिपानां प्रतिपत्तिच्छेदवित् ।
सौरादीनां च मानानां सदृशासदृशयोग्यायोग्यत्वप्रतिपादनपटुः सिद्धांतभेदेप्ययननि
वृत्तौ प्रत्यक्षं सममंडलरेखासंप्रयोगाभ्युदितांशकानां च छायाजलयंत्रदृग्गणितसाम्ये
न प्रतिपादनकुशलः सूर्यादीनां च ग्रहाणां शीघ्रमंदयाम्योत्तरनीचोच्चगतिकारणाभि
ज्ञः सूर्याचंद्रमसोश्च ग्रहणे ग्रहणादिमोक्षकालदिक्प्रमाणयोजनकक्ष्याप्रमाणप्रति
विषययोजनपरिच्छेदनकुशलः भूभगणभ्रमणसंस्थानाद्यक्षावलंबकापक्रमाह २

स्थितिविमर्दवर्णदेशाननागतग्रहसमागमयुद्धानामादेष्टाप्रत्येकग्रहभ्रमण

नयाग्रहगतिस्तंत्राभिधानस्त्वसौ होराख्यांगविनिश्चयश्चकथितःस्कंधस्तृतीयोप
रः ९ वक्रानुवक्रास्तमयोदयाद्यास्ताराग्रहाणांकरणेमयोक्ताः होरागतंविस्तरत
श्चजन्मयात्राविवाहैःसहपूर्वमुक्तं १० प्रश्नप्रतिप्रश्नकथाप्रसंगात्स्वल्पोपयोगात्
ग्रहसंभवाच्च संत्यज्यफल्गूनिचसारभूतंभूतार्थमर्थैःसकलैःप्रवक्ष्ये ११ गणितं
जातकंसारवांयोवेत्तिद्विजपुंगवः त्रिस्कंधज्योतिर्निर्दिष्टःसंहितापारगश्चसः १२ इ
त्याचार्यवराहमिहिरसंहितायांशास्त्रोपनयनंनामाध्यायःप्रथमसमाप्तः अथातःसां
वत्सरंसूत्रंव्याख्यास्यामः तत्रसांवत्सरःप्रसूतोभिजातः प्रियदर्शनोविनीतवेषःसत्य
वागनसूयकः समसुसंहितोपचितगात्रसंधिरविकलश्चारुकरचरणनखनयनचि
बुकदशनश्रवणललाटभ्रूउत्तमांगोवपुः कुष्मान्गंभीरोदात्तघोषः प्रायःशरीरानु
कारानुवर्तिनोहिगुणाश्चदोषाभवंतितेत्रगुणाः शुचिर्दक्षःप्रगल्भोवाग्मीप्रतिभावा
न्देशकालवित्सात्विकोनपरिषद्भीरुः सहाध्यायिभिरनभिभवनीयः कुशलोव्यस

३

निविवाहादीनांचकर्मणांकारणं यात्रायांचतिथिदिवसकरनक्षत्रमुहूर्त्तविलग्नो
योगदेहस्कंदनस्वप्नविजयस्नानग्रहयज्ञगणयोगाग्निलिंगहस्त्यश्वेंगितासेनाप्रसे
नाप्रवादिचेष्टाषाड्गुण्यपायुमंगलामंगलसकुनसैन्यनिवेसभूमयोग्निवर्ण
मंत्रिचरदूताटविकानांयथाकालंप्रयोगापरदुर्गोपलंभोपायाश्चेत्युक्तंचाचार्यैः जग
तिप्रसारितमिवालिखितमिवमतौनिषिक्तमिवहृदयेशास्त्रं यस्यसभगणंनादेशाः
निष्फलास्तस्य १ संहितापारगश्चदैवचिंतकोभवतियत्रैतेसंहितापदार्थाः दिन
करादीनांग्रहाणांचारास्तेषांप्रकृतिविकृतिप्रमाणवर्णकिरणद्युतिरूपसंस्था
नास्तमनोदयमार्गमार्गांतरवक्रानुवक्रर्क्षग्रहसमागमचारादिभिः फलानिनक्षत्रकू
र्म्मविभागेनदेशेष्वगस्तिचारः सप्तर्षिचारोग्रहभुक्तयोनक्षत्रव्यूहग्रहशृंगाटकग्र
हयुद्ध शशिग्रहसमागमग्रहवर्षफलगर्भलक्षणाधारणाप्रवर्षणरोहिणीस्वात्या
षाढीयोगाः सद्योवर्षकुसुमलतापरिवेषपरिघपवनोल्कापातदिग्दाहहि ३

र्मांसचरदलकालराश्योदयछायानाडीकरणप्रश्नेषु क्षेत्रकालकरणेष्वभिज्ञः ना
नाचोद्यप्रश्नभेदोपलब्धिजनितवाक्सारो निकषच्छेदसंतापादिभिर्निवेशैः कनकस्ये
वाधिकतरममलीकृतस्य शास्त्रस्यैव ज्ञाता तंत्रज्ञो भवति । उक्तं च गर्गेण न प्रतिबद्धं गम
यति वक्ति न च प्रश्नमेकमपि पृष्टः । निगदति न च शिष्येभ्यः स कथं शास्त्रार्थवित् ज्ञेयः ॥१॥
ग्रंथोन्यथान्यथार्थं करणं यश्चान्यथा करोति बुधः । स पितामहमुपगम्य स्तौति नरो वैशिके
नार्यो ॥ २ ॥ तंत्रेसु परिज्ञाते लग्ने छायांबुसंविदिते । होरार्थे च सुरूढे नादेष्टुर्भारती वंध्या
॥ होराशास्त्रेपि चरासि होरा द्रेष्काण नवांस द्वादसभाग त्रिंशद्भाग बलाबलपरि
ग्रहो ग्रहाणां च दिक्स्थानकालचेष्टाभिरनेकप्रकारबलनिर्धारणं प्रकृतिधातुद्रव्य
जातिचेष्टादिपरिग्रहो निषेकजन्मकालविस्मापनप्रत्ययादेशः सद्योमरणायुर्दाय
दशांतर्दशाष्टकवर्गकर्माजीवराज्ययोग चंद्रयोग द्विग्रहादियोग नाभसादीनां च यो
गानां फलान्याश्रयभावावलोकननिर्याणगत्यनूकानि तत्कालप्रश्नशुभाशुभनिमित्ता

समाश्रिताः

प

४ संहोरागणितनैष्ठिकं योनपूजतेराजासनाशमुपगच्छति १ वनंतोश्रमेमोयेचनिर्ममा
तिःपरिग्रहाः अपितेपरिपृच्छंतियोतिषांगतिकोविदं २ अप्रदीपायथारात्रिरनादि
त्यंयथानभः तथासांवत्सरोराजाभ्रमत्यंधइवाध्वनि ३ मुहूर्ततिथिनक्षत्रऋतवश्चा
यनेतथा सर्वाण्येवाकुलानिस्युर्नस्यात्सांवत्सरोयदि ४ तस्माद्राज्ञाधिगंतव्योविद्वा
न्सांवत्सरोग्रणीः जयंयशःश्रियंभोगान्श्रेयश्चसमभीप्सता ५ नासांवत्सरिकेदेशेवस्त
व्यंभूतिमिच्छता चक्षुर्भूतोहियत्रैषपापंतत्रनविद्यते ६ नसांवत्सरपाठीचनरकेषूपप
द्यतेब्रह्मलोकप्रतिष्ठांचलभतेदैवचिंतकः ७ ग्रंथतश्चार्थतश्चैवकृत्स्नंजानातियोद्वि
जः अग्रभुक्सभवेच्छ्राद्धेपूजितःपंक्तिपावनः ८ म्लेच्छाहियवनास्तेषुसम्यक्शास्त्रमिदं
स्थितं ऋषिवत्तेपिपूज्यंते किंपुनर्दैवविद्द्विजः ९ कुहकावेशपिहितैःकर्णोपश्रुतिहे
तुभिः कृतादेशोनसर्वत्रप्रष्टव्योनसदैववित् १० अविदित्वैवयःशास्त्रंदैवज्ञत्वंप्रकाशते
सपंक्तिदूषकःपापोज्ञेयोनक्षत्रसूचकः ११ नक्षत्रसूचकोदृष्टमुपसंवाकरोतियः। ४

ल

तिचंन संध्यारागगंधर्वनगररजोनिर्घातार्घकांडसस्यजन्मध्वजेंद्रचापवास्तुविद्यांग
गविद्यावायसविद्यांतरचक्रमृगचक्रश्वचक्रवातचक्रप्रासादलक्षण वज्रलेपप्रतिमा
लक्षणावनसंवेशप्रतिष्ठापन वृक्षायुर्वेदोदगार्गलनीराजनखंजनकोत्पातशांतिघृत
कंबलमयूरचित्रक षंडपट्टपरीक्षाकृकवाकुकूर्मगोजाश्वेभपुरुषस्त्रीलक्षणांतः पु
रचिंतापिटकलक्षणोपानच्छेद छत्रचामरदंडशयनासनलक्षण रत्नपरीक्षा
गंधयुक्ति दीपलक्षणं दंतकाष्ठाद्याश्रितानि शुभाशुभनिमित्तानि सामान्यानि च जगतः प्रतिपु ज६
रुषं चा प्रति वेच प्रतिक्षणमनन्यकर्मणाभियुक्तेन दैवज्ञेन चिंतयितव्यानि न चैकाकिना
सकलं ते ऽहर्निशमवधारयितुं निमित्तानि तस्मात्सुसंभृतेन दैवज्ञेनान्येपि तद्विदोष्टौ भ
र्तव्या तत्रैकेनैंद्री चाग्नेयी च दिगवलोकयितव्या याम्या नैर्ऋती वारुणी वायव्या चोत्तरा
वैशानी चेति यस्मादुल्कापातादि निमित्तानि सीघ्रमुपगच्छंति तेषां चाकरवर्णस्नेहप्रमा
णादि ग्रहरिक्षाभिघातादिभिः फलानि भवंतीति उक्तं च गार्गेण कृत्स्नांगोपांगकुश

५

आश्लेषार्धाद्दक्षिणमुत्तरमयनं रवेर्धनिष्ठाद्यं नूनं कदाचिदासीत् येनोक्तं पूर्वशास्त्रेषु सां
प्रतमयनं सवितुः कर्कटकाद्यं मृगादितश्चान्यत् उक्ताभावो विकृतिः प्रत्यक्षपरीक्षणैर्व्य
क्तिः २ दूरस्थचिह्नवेधादुदयेऽस्तमयेऽपि वा सहस्रांशोः छायाप्रवेशनिर्गमचिह्नैर्वा मंड
ले महति ३ अप्राप्यमकरमर्को विनिवृत्तो हंति सापरां याम्यां कर्कटकमसंप्राप्तो विनि
वृत्तश्चोत्तरामैंद्रीं ४ उत्तरमयनमतीत्य व्यावृत्तः क्षेमसस्यवृद्धिकरः प्रकृतिस्थश्चाप्ये
वं विकृतगति[illegible]सप्तभूपान् जनांश्च शस्त्राग्निदुर्भिक्षैः ६ तामस
कीलकसंज्ञा राहुसुताः केतवस्त्रयस्त्रिंशत् वर्णस्थानाकारैस्तान् दृष्ट्वार्के फलं ब्रूयात्
७ तेचार्कमंडलगताः पापफलाश्चंद्रमंडले सौम्याः ध्वांक्षकबंधप्रहरणरूपाः पापाः
शशांकेपि ८ तेषामुदये रूपाण्यंभः कलुषं रजोवृतं व्योम नगतरुशिखरामर्दी
सशर्करो मारुतश्चंडः ९ ऋतुविपरीतास्तरवो दीप्ता मृगपक्षिणो दिशां दाहः निर्घातम
हीकंपादयो भवंति तथोत्पाताः १० न पृथक्फलानि तेषां शिखिकीलकराहुदर्शनं यदि ५

भयकृदुष्णांशुः
५ सतमस्कःपर्व
विनात्वष्टानामा
र्कमंडलंकुरुते
सनिहंति ४६

काकसदृशाः छिन्नशिराः खड्गादिरूपाः

सत्रजत्यंधतामिश्रे सा द्वैमस्तविदं विना नगरद्वारलोष्टस्य यद्वद्यादुपयाचितं आदेश
स्तद्वदज्ञानामसत्यः संविभाव्यते १३ संपत्यायोजितादेशस्तद्विछिन्नकथाप्रियः मत्तःशा
स्त्रैकदेशेन त्याज्यस्ताहृशो महीक्षिता १४ यस्तु सम्यग्विजानाति होरागणितसंहिताः अभ्य
र्च्यः स नरेंद्रेण कर्त्तव्याच हितैषिणा १५ न तत्सहस्रं करिणां वाजिनां वा चतुर्गुणं करोति दे

न५

शकालज्ञो यद्वेको दैवचिंतकः १६ दुःस्वप्नदुर्विचिंतितं दुःप्रेक्षितदुष्कृतानि कर्म्माणि क्षिप्रं
प्रयांति निधनं शशिनः श्रुत्वा तु संवादं १७ न तथेच्छति नृपतेः पिता जननी वा स्वजनो
ऽथवा सुहृत् स्वयशोभिविवृद्धये यथा हितमाप्तः सबलस्तु दैववित् १८ ज्योतिशास्त्रम
हापुण्यं चंद्रार्कैर्यस्य साक्षिणौ यस्तु ज्ञानात्म सो याति भित्वा सूर्यस्य मंडलं १९ अप्रत्यक्षाणि
शास्त्राणि विवादस्तेषु केवलं प्रत्यक्षं ज्योतिषं शास्त्रं चंद्रार्कौ यस्य साक्षिणौ २० एकं ज्योतिष
शास्त्रं कलियुगकाले पि गर्वमुद्वहति यस्य कृताधिकनिर्वाहेर्न सक्यते चालनाकर्तुं २१
इति श्री इत्याचार्य श्रीविराहमिहरसंहितायां सांवत्सरसूत्रं नामाध्यायो द्वितीयः ॥श्री

६ कुर्लं करोत्यर्कौ तस्करवास्त्रनिपाते यदि सलिलं न समुपानयति २२ ताम्रकपिलो
वार्कः शिशिरे हरिकुंकमच्छविर्व्वसंतौ आपांडुकर्मकवर्णो ग्रीष्मे वर्षासु शुक्लश्च २३
शरदि कमलोदराभो हेमंते रुधिरसंनिभः प्रावृट्काले स्निग्धसवर्णनिभो पिशुभदा
यी २४ रुक्षः श्वेतो विप्रान् रक्ताभः क्षत्रियान् विनाशयति पीतो वैश्यान् कृष्णस्तोय
दानशुभकरः स्निग्धः २५ ग्रीष्मे रक्तो भयकृत्तु वर्षासु असितः करोत्यवर्षं च हेमन्ते पीतो
इन्द्रधनुःसदृशेन चिह्नेन चिह्नितः तनुः
र्क्कः करोति न चिरेण रोगभयं २६ सुरचापपाटिततनुर्नृपति विरोधप्रदः सहस्रांशुः प्रा
वृट्काले स्निग्धः करोति विमलद्युतिर्वृष्टिं २७ वर्षाकाले वृष्टिं करोत्यसद्यः शरीषपु
ष्पाभः शिखिपत्रनिभः सलिलं न करोति द्वादशाब्दानि २८ श्यामेर्क्के कीटभयं भस्म
निभे भयमुपशांति पररचक्रात् यस्य च्छेदेर्क्के छिद्रस्तस्य विनाशं क्षितिशस्य २९ शशरुधि
मध्याह्नकाले
रनिभे भानौ मध्याह्नकाले नभस्यलस्थे भवंति संग्रामाः शशिसदृशे नृपतिवधः क्षिप्रं
चान्यो नृपो भवति ३० कल्माषकुक्कुटनिभः खंडो जनहा विग्रहोपकरणरूपैश्छत्रध्वज ६

6

चेत् तदुदयकारणमेषांकेत्वादीनांफलंब्रूयात् ११ यस्मिन् यस्मिन् देशे दर्शनमायांति सूर्यविंवगताः तस्मिन् तस्मिन् व्यसनं महीपतीनां परिज्ञेयं १२ क्षुत्क्षामम्लानशरीरा मुनयोप्युत्सृष्टधर्मसच्चरिताः निर्मांसहस्ताः बालकच्छाग्रच्छागा यांतिपरदेशं १३ तस्करविलुप्तवित्ताः प्रदीर्घनिश्वासमुकुलिताक्षिपुटाः संतः सन्नशरीराशोकोद्भवबाष्परुद्धदृशः १४ क्षामाजुगुप्समानाः स्वनृपतिपरचक्रपीडितामनुजाः स्वनृपतिचरितं कर्मचपुराकृतं प्रब्रुवंत्यन्ये १५ गर्भेष्वपिनिष्पन्ना वारिमुचो नप्रभूरिवारिमुचः सरितोयांतितनुत्वंक्वचित्क्वचिज्जायतेसस्यं १६ दंडेनरेंद्रमृत्युर्व्याधिभयंस्यात्कवंधसंस्थाने ध्वांक्षेचतस्करभयं दुर्भिक्षंकीलकेर्कस्थे १७ छायाः स्यान्नरपतेर्विनाशायसितरक्तपीतकृष्णैस्तैर्विद्धोद्विजातिवर्णघ्नः १८ (दृश्यंतेचयतस्ते रविविंवस्योच्छ्रिताम हीपालाता आगच्छतिलोकानांतेनैवभयंप्रदिशेन २० ऊर्ध्वकरोदिवसकरोस्ताम्रः सेनापतिंविनाशयति पीतोनरेंद्रपुत्रंश्वेतस्तुपुरोहितंहंति २१ चित्रोपयवापिधूम्रोरविरस्मिव्या

दृश्यंते इत्यादि षट् श्लोकाः क्षे

हस्तप्राद्यः ... राजोपकरणरूपैश्छत्रध्वजचामरादिभिर्विद्धः राजन्यत्वकृद्दर्वः स्फुलिंगधूमादिभिर्जनः १९
कादृश्मिषिकरो ४४

ब्रह्मसिद्धान्ते ॥ रविदृष्टं सितमर्द्धं कथमदृष्टं यथा नभस्थस्य कुम्भस्य तथासन्नरवेरधःस्थस्य चंद्रस्य १ तथा च सूर्यसिद्धान्ते ॥ जलरूपस्याप्यध-
स्थस्य नित्यं भासयते रविः अर्द्धं शशांकबिंबस्य न द्वितीयं कथंचन ॥१॥ तेजसां गोलकः सूर्यो ग्रहर्क्षाण्यम्बुगोलकाः प्रभावन्तो हि दृ-
श्यन्ते सूर्यरश्मिविदीपिताः ॥२॥ ३

७

अमलवपुरवक्रमंडलः स्फुटविपुलामलदीर्घदीधितिः अविकृततनुवर्णचिह्नभृज्ज-
गति करोति शिवं दिवाकरः ४० इत्याचार्यश्रीवराहसंहितायां आदित्यचारो नाम तृती-
योध्यायः ३॥ नित्यमधःस्थस्येन्दोर्भाभिर्भानोः सितं भवत्यर्द्धं स्वच्छाययान्यदसितं कुम्भस्येवा-
तपस्थस्य १ सलिलमये शशिनि रवेर्दीधितयो मूर्छितास्तमो नैशं क्षपयन्ति दर्पणोदर-
विहिता इव मंदिरस्यान्तः २ त्यजतोर्कतलं शशिनः पश्चादवलम्बते यथा शौक्ल्यं दिनकर-
वशात्तथेन्दोः प्रकाशतेऽधः प्रभृत्युदयं ३ प्रतिदिवसमेवमर्कात्स्थानविशेषेण शौक्ल्यप-
रिवृद्धिः भवति शशिनोऽपराह्णे पश्चाद्भागे घटस्येव ४ ऐंद्रस्य शीतकिरणो मूलाषाढाद्व-
यस्य चायातः याम्येन बीजजलचरकाननहा वह्निभयदश्च ५ दक्षिणपार्श्वेन गतः श-
शी विशाखानुराधयोः पापः मध्येन तु प्रशस्तः पितृदेवविशाखयोश्चापि ६ षडनागता-
नि पौष्णाद्द्वादश रौद्राच्च मध्ययोगीनि ज्येष्ठाद्यानि नवर्क्षाण्युडुपतिनातीत्य युज्यन्ते ७ उन्नत-
मीषच्छृंगं नौसंस्थाने विशालता प्रोक्ता नाविनां तस्मिन् शुभं नाविकपीडा तस्मिन् भ-

उत्तरेणायातः शीतकरः शुभः

उत्तरेणा शुभः

पैत्र्यमूलस्य... योगः

अविशाखादुत्तरेणापि शुभः ३

...प्रकर्षे यदायाति
...धस्ताच्चंद्रमार
...: तथा तस्य च मू
...रूपमंशं प्राप्यते
...वि: ॥५

...दूस्य
...मीनश भाग्यदस्य
...वन्यासंयोगोदृश्य

७

नि २

कर्णधाराणां ९

चामरादिभिर्विद्धः राजान्यत्वंकरोत्यर्कः स्फुलिंगधूमादिभिर्जनना १८ ।कोदण्डभित्तकर

रीधितिभिर्यदः तोरणरूपःपुरहाछत्रनिभोदेशनाशाय ३१ ध्वजचापनिभेयुद्धानिभा

स्करेवेपितेचरूक्षेच कृष्णारेखासवितरियदिहंतितत्तोनृपंसचिवः ३२ दिवसकरंसमुद

यसंस्थितमुल्काशनिविद्युतोयदाहन्युः नरपतिमरणंविद्यात्तदान्यराज्यप्रतिष्ठांच ३३

सर्वदिवसे रक्तोदृत्यर्कः

प्रतिदिवसमहिमकिरणःपरिवेषीसंध्ययोर्द्वयोरथवा रक्तोस्तमेतिरक्तोदितश्चभूपं

करोत्यन्यं ३४ प्रहरणरूपैर्जलदैःस्थगितः संध्याद्वयेपिरणकारी मृगमहिषविहग

नक्षत्र

खरकरभसदृशरूपैश्चभयदायी ३५ दिनकरकराभितापाद्वृत्तमवाप्नोतिसुमहतीपी

डां भवतिहिपश्चात्शुद्धंकनकमिवहुताशपरितापात् ३६ दिवसकृतःप्रतिसूर्यो

जलकृद्दगदक्षिणोस्थितोनिलकृत् उभयस्थःसलिलभयंनृपमुपरिनिहंत्यधोजनहा

३७ रुधिरनिभोवियत्स्थोवनिपांतकरोनचिरात् परुषरजोरुणीकृततनुर्यदिवादिनकृत्

३८ असितविचित्रनीलपरुषोजनघातकरः खगमृगभैरवस्वररुतैश्चनिशाद्यमुखे ३९

८

हीनवति १९ श्रेयो विशालमूर्त्तिर्नरपतिलक्ष्मीविवर्द्धये चंद्रः स्थूलः सुभिक्षकारी

[दुर्भिक्षकारी] [गह्वर वासिनः]

प्रियधान्यकरश्च तनुमूर्त्तिः २० प्रत्यंतान्कुनृपान्निहंत्युडुपतिः शृंगे कुजेनाहतो।

शस्त्रक्षुद्भयकृद्यमेन शशिजेनावृष्टिदुर्भिक्षकृत् श्रेष्ठान् हंति नृपान्महेंद्रगुरुणा।

[किंचित्]

शुक्रेन चाल्पान्नृपान् शुक्ले [illegible] यातमिदं फलं ग्रहकृतं कृष्णे त्वायोत्ता[?]गमं २१ भि

[मध्यादिचारितः]

न्नसितेन यवनान्मगधान्पुलिंदान्नेपालवंगमरुकच्छसुराष्ट्रमद्रान् पांचालकैक

यकुलूतकपौरषादीन्हन्यादुशीनरजनानपि सप्तमासान् २२ गांधारसौवीरसिंधु [क ६]

कीरान् धान्यानि शैलान् द्रविडाधिपांश्च द्विजांश्च मासान्दश शीतरश्मिः संतापयेद्वाक्

तिना विभिन्नः २३ उग्रान्सुरान्सहवाहनैर्नरपतीं स्त्रैगर्त्तकान्मालवान् कौलिंदान्ग [न ४]

णपुंगवान्थ शिबीनायोध्यकान्पार्थिवान् हन्यात्कौरवमत्स्यशुक्त्यधिपतीन् राजन्यमु

ख्यानपि प्रालेयांशुरसृक्स्रग्रहेतनुगते षण्मासमर्यादया २४ यौधेयान्सचिवान्सकौ

रवान् प्रागीशानेयचार्जुनायनान् विनिहंत्यर्कजभिन्नमंडलः शीतगुर्दशमासपीडया २५ ८

नां ९

चंद्ररेखा यदा चोर्ध्वे त्र्यंशे चेद्दृश्यते स्थानोदक्कृष्णगामिकः सो दंडस्थानं तदुच्यते ४

वति शिवं सर्वलोकस्य ८ अर्द्धोन्नते च लांगलमिति पीडा तदुपजीविनां तस्मिन् प्रीतिश्चा
निमित्तं मनुजपतीनां सुभिक्षं च ९ दक्षिणविषाणमर्द्धोन्नतं यदा दुष्टलांगलाख्यं तत्
पांड्यनरेश्वरनिधनकृदुद्योगकरं बलानां च १० समशशिनि सुभिक्षक्षेमवृष्टयः प्र
थमदिवससदृशाः स्युः दंडवदुदिते पीडा गवां नृपश्चोग्रदंडोऽत्र ११ कार्मुकरूपे युद्धा
नि जयस्तेषां स्थानयुगमिति याम्योत्तरायनं भूमिकंपाय १२ युगमेव याम्यकोट्यां किं
चित्तुंगं स पार्श्वशायीति विनिहंति सार्थवाहान् वृष्टेर्विनिग्रहं कुर्यात् १३ अभ्युच्छ्रा
यादेकं यदि शशिनो वाप्यवाङ्मुखं शृंगं आवर्जितमित्यसुभिक्षकारि तद्गोधनस्यापि १४
अव्युच्छिन्ना रेखा समंततो मंडले च कुंडाख्ये तस्मिन् मांडलिकानां स्थानत्यागो नरपती
नां १५ प्रोक्तस्थानाभावादुदगुच्चः सस्यवृद्धिवृष्टिकरः दक्षिणतुंगश्चंद्रो दुर्भिक्षभ
याय निर्दिष्टः १६ शृंगेणैकेनेंदुं विलीनमथवाप्यवाङ्मुखं शृंगं संपूर्णं चाभिनवं दृ
ष्ट्वैको जिविताच्च्यवते १७ मध्यतनुर्वज्राख्यः क्षुद्भयदः संभ्रमः पराज्ञां च क्षेमसुभिक्षाव



संस्थानविधिः कथितो रूपाण्यस्माद्भवंति चंद्रमसः स्वल्पो दुर्भिक्षकरो महान् सुभिक्षावहः प्रोक्तः १८ x १

९

ऽमंडलाकृतिरसितत्वाल्लिलनसदृश्यते भगणेऽन्यत्रपर्वकालादन्यदानाल्कमलयोनेः
२ मुखपुच्छविभक्तांगं भुजंगमाकारं दिशंत्यन्ये कथयं ... समूर्त्तमपरेतमोमयं सैंहिकेयाख्यं
३ यदि मूर्त्तो दिविचारी शिरोथवामंडलीभवति राहुः भगणार्द्धेनांतरितो गृन्हाति कथं
नियतचारः ४ अनियतचारः खलुचेदुपलब्धिः संख्ययाकथंतस्य पुच्छाननाभिधानों
तरेणकस्मान्नगृन्हाति ५ अथच भुजंगेद्ररूपः पुच्छेन मुखेन वासगृन्हाति मुखपुच्छां त
रसंस्थंस्थगयति कस्मान्न भगणार्द्धे राहुद्वयं यदि स्यात् ग्रस्तेस्तमितेथवोदितेचंद्रे तत्सम
गतिनान्येन ग्रस्तः सूर्योपि दृश्येत ७ भूच्छायां स्वग्रहणे भास्कर मर्कग्रहे प्रविसतीदुः प्र
ग्रहणमतः पश्चान्नेंदोर्भानोश्च पूर्वाद्येत ८ वृक्षस्य स्वच्छाया यथैकपार्श्वे भवति दीर्घा च
निशि निशितद्वत् भूमेरावरणवसाद्दिनेशस्य ९ सूर्यात्सप्तमराशौ यदि चोदग्दक्षिणेननां
तिगतः प्रतिदेशमतश्चित्रं हन्नास्कर ग्रहचंद्रः पूर्वाभिमुखः छायामौर्वीं तदाविशति १०
चंद्रोधस्थः स्थगयति रविमंबुदवत्समागतः प्रतिदेशमतः चित्रं दृग्विषयाद्भास्करग्रह ९

Marginal and interlinear notes:

अग्राने

मुखपुच्छाभ्यां ... सि

मूर्तो ...

सूर्याचंद्रमसौ

तिस्रोलिप्ताः एकाद शविलिप्ताः ४

अस्मिन्राशौ ... स्थित ...

यथाराशि ... येनग्रपेरं ...

... नियतचारः अनियतचारः

अनियतचारेण चंद्रः ग्रसनेः ६

नियतचारेः

छाया

नतिर्विक्षेपः

चंद्रग्रहणं सर्वत्रएकरूपं सूर्यग्रहे प्रतिदेशविचित्रता भवति १

पश्चात् १

दृष्टिवशात् १

शतयुगसदृशंवदेत्

मगधान्मथुरांश्चपीडयेद्वेणायाश्चतटंशशांकजः अपरत्रकृतंयुगंवदेत् यदिभित्त्वाश
शिनंविनिर्गतः २६ क्षेमारोग्यसुभिक्षविनाशी शीतांशुः शिखिनायदिभिन्नः कुर्यादा
युधजीविविनाशंचौराणामधिकेनचपीडां २७ उल्कायां यदाशशीग्रस्तएवहन्यतेह
न्यतेतदानृपोयस्यजन्मनिस्थितः २८ भस्मनिभःपरुषोरुणमूर्त्तिः शीतकरः किरणैःपरि
हीनः श्यामतनुःस्फुटितः स्फुरणोवाक्षुड्डमरामयचौरभयाय २९ शुक्लेपक्षेसंप्रवृद्धेप्र
वृद्धिंब्रह्मक्षत्रंयातिवृद्धिंप्रजाश्चहीनेहानिंतुल्यतातुल्यतायांकृष्णेसर्वंतत्फलंव्यत्ययेन ३०
निर्लेपकुंदकुमुदस्फटिकावदातो यत्नादिवांडिसुतयापरिमृज्यचंद्रः उच्चैःकृतोनि
शिभवत्तिमेशिवाययोदृश्यतेसभविताजगतःशिवाय ३१ यदिकुमुदमृणालहारगौ
रस्तिथिनियमात्क्षयमेतिवर्द्धतेवा अविकृतगतिमंडलांशुयोगीभवतिनृणांविजयायशी
तरश्मिः ३२ इतिश्रीवाराहमिहरसंहितायांचंद्रचारोनामचतुर्थोध्यायः ४॥ श्रमतास्वा
दविशेषाछिन्नमपिशिरः किलासुरस्येदं प्राणैरपरित्यक्तंग्रहतांयातंवदंत्येके १ इंद्र

नाम २

१०

स्यैतस्मिन् पीडा विदुषामवृष्टिश्च २१ ऐंद्रो नृपविरोधाः शारदसस्यक्षयो न च क्षेमं कौवेरे
र्थपतीनामर्थविनाशः सुभिक्षं च २२ वारुणमवनीशाशुभमन्येषां क्षेमसस्यवृद्धिकरं आ
ग्नेयं सिग्मास्यं सस्यारोग्याभयांबुकरं २३ याम्यं करोत्यवृष्टिं दुर्भिक्षं संक्षयं च लोकानां यदतः
परं तदशुभं क्षुन्मारकावृष्टिदं पर्व २४ वेलाहीने पर्वणि गर्भविपत्तिश्च शस्त्रकोपश्च अति
वेले कुसुमफलक्षयो भयं सस्यकोपश्च २५ हीनातिरिक्तकाले फलमुक्तं पूर्वशास्त्रदृष्टत्वा
त् स्फुटगणितविदां कालः कथंचिदपि नान्यथा भवति २६ यद्येकस्मिन्मासे ग्रहणं रविसो
मयोस्तदा क्षितिपाः स्वबलक्षोभैः संक्षयमायांत्यतिशस्त्रकोपश्च २७ ग्रस्तावुदितास्तमितौ
शारदधान्यावनीश्वरक्षयदौ सर्वग्रस्तौ दुर्भिक्षमरकदौ पापसंदृष्टौ २८ अर्धोदितोपर
क्तो नैष्कृतिकान् हंति सर्वयज्ञांश्च अग्न्युपजीविगुणाधिकविप्राश्रमिणो युगाभ्युदितः २९
कर्षकपाषंडिवणिक्क्षत्रियबलनायकान् द्वितीयेंशे कारुकशूद्रम्लेच्छान् स्वतृतीयें
शे समंत्रिजनान् ३० मध्याह्ने नरपतिमध्यदेशहा शोभनश्च धान्यार्घः तृणभुगमात्यं: १०

क्रमतः चंद्रे ग्रस्तोदिते ग्रस्तास्ते शारदधान्यनाशः सूर्ये ऽवनीश्वरक्षयः ४

10

णं ११ महेंदिशो आवेरणं कुंठविषायास्ततोऽद्धे संछन्नः स्वल्पं रवेर्यतो तस्तीक्ष्णाविषाणोर
विर्भवति १२ एवमुपरागकारणमुक्तमिदं दिव्यदृग्भिराचार्यैः राहुरकारणमस्मिन्निसुक
परमार्थः
शास्त्रसद्भावः १३ योसावसुरो राहुस्तस्य वरो ब्रह्मणा पुरा दत्तः आप्यायनमुपरागे दत्त
हुताशेन ते भविता १४ तस्मिन् काले सान्निध्यमस्य तेनोपचर्यते राहुः याम्योत्तरशशिश
तिगणितेप्यपचर्यते येन १५ न कथंचिदपि निमित्तैर्ग्रहणं विज्ञायते निमीत्तानि अन्यस्मिन्न
न सा स्फुटी कृतेनेराहुः
पि काले नत्वा स्फुटीकृतेन शरेन यस्मान्न विचिंत्यमिदं विपश्चिद्भिः १६ अवनत्या क्षेपासौदि
कृन्नेयावलनया अवनत्याच तिथ्यवसानावेला करणे कथितानि मया १७ खंडखाद्यके पूरण
दिनवृंदात् खशर ५० म्राप्तहृनवरदिग्भिः २९६ विभाजितात्फलं प्राप्तं रामत्रुरवेद १०६३
सहितं क्षिपेत् ध्रुवं देभजेत्तद्वधृतिभि १८० लब्धं कमलज पूर्वपर्वगणः सप्त ७ भाजिते
ऽशेषे तगम्ये १९ षण्मासोत्तरवृद्ध्या पर्वेशाः सप्त देवताः ७ क्रमशः ब्रह्मशशीन्द्रकुबे
रावरुणाग्नियमश्च विज्ञेया २० ब्राह्मे द्विजपशुवृद्धिः क्षेमारोग्याणि सस्य संपच्चात दद्वै।

मवंत्यर्थोत्पातरूपाणि ... पर्वतनैलं चजातेः ४६

११

विलेखकर्मोद्यतकान् हंत्यस्मकान्त्रिपुरपालितुतान्प्रदेसान् ५० तुलाधरेवंत्यपरां
त्यसाधून् वणिक्दशार्णान्भरकछकांश्चअलिन्यथोदुंवरमद्रचोलान्द्रुमान्सुयौधे
यविषायुधांश्च ५१ धन्विन्यमात्यवरवाजिविदेहमल्लान् पांचालवैद्यवणिजो विषमायु
धज्ञान् हन्यान्मृगेतुरुषमंत्रिकुलानिनीचान् मंत्रौषधीषुकुशलान्स्थविरान्युधी
यान् ५२ कुंभेंतर्गिरिजान्सपश्चिमजनात् भारोद्वहांस्तस्करान् आभीरान्दरदार
सिंहपुरकान् हन्यात्तथाबर्बरान् मीनेसागरकूलसागरजलद्रव्याणिमान्यान्जनान्
प्राज्ञान्वार्युपजीविनश्चभफलं कूर्मोपदेशाद्वदेत् ५३ सव्यापसव्यलेहग्रसननिरोधावम
र्दनारोहाः आघ्रातंमध्यतमस्तमोंत्यइतिदेशग्रासाः ५४ सव्यगतेतमसिजगज्जलप्लुतं
भवतिमुदितंचभयंच अपसव्येनरपतितस्करावमर्दः प्रजानाशः ५५ जिह्वोपलेढि
परितस्तिमिरनुदोमंडलंयदिसलेहः प्रमुदितसमस्तभूताप्रभूततोयाचतत्रमही ५६
ग्रसनमितिपदाद्यंशः पादोवाग्रस्यतेथवाप्यर्द्धस्फीतनृपवित्तहानिपीडाचस्फीतदेशा ११

जिह्वयारसनयालेढि
मिवस्पृशतेसमंततः ३

ग्रासदिनप्रमाणास्यपरमतिभोगमप
पल्लभ्यते तदेव खांशमानं ग्रमेनाकाश
स तत्पाकतं भवति १



पुरवैश्यघ्नः पंचमे खांशे ३१ स्त्रीशूद्रान् षष्ठेंशे स्फबल्यं तदास्तमयकाले यस्मिन् खांशे मोत्तं
स्तस्यौकानां शुभं भवति ३२ द्विजनृपतीनुदगयने विट्शूद्रान् दक्षिणायने हंति राहुरु
दगादिदृष्टः शूद्रत्तणदृति विप्रादीन् ३३ म्लेछान्विदिक्स्थितो यायिनश्च हन्याकृताश
शांकांश्च सलिलचरदृतिघाती याम्येनौदग्गावामशुभः ३४ पूर्वेण शलिल[illegible] पूर्णकरो
ति वसुधातलं दैत्यः पश्चात्कर्षकसेवककवाजिविनाशाय निर्दिष्टः ३५ पंचालकलिंगसूर
१५ सेनाः कांबोजौकिरातशस्त्रवार्त्ताजीवंति च ये कृताशास्त्वाते पीडामुपयांति मेषसंस्थे
३६ गोपाः पशवोथ गोमिनो मनुजाश्च महत्त्वमागताः तेपीडामुपयांति भास्करे ग्रस्तेशी
तकरे थवा वृषे ३७ मिथुने प्रवरांगना नृपान् पमात्रां बलिनं कलाविदः यमुनात
टजाः सबाह्लिकामत्स्याः सुवस्त्रजनैः समन्विताः ३८ आभीरान् शबरान् सवाह्लवान्
मल्लान्मत्स्यकुरून्शकानपि पांचालान्विकलांश्च पीडयत्यन्नं चापि निहंति कर्कटे ३९
सिंहे पुलिंदगणान्मेकलसत्वयुक्तान्राजोपमान्नरपतीन्वनगोचरांश्च षष्ठे तु सस्यक

१२

पीताभेवैश्यध्वंसीभवेत्सुभिक्षाय सार्चिष्मत्यग्निभयंगैरिकरूपेतुयुद्धानि ५८ दूर्वाकां
डश्यामेहारिद्रेचापिनिर्दिशेन्मरकं अशनिभयसंप्रदायी पाटलकुसमोपमोराहुः ५९
पांशुविलोहितरूपःक्षत्रध्वंसायभवतिवृष्टेश्चबाल रविकमलसुरचापरूपधृक्शस्त्र
कोपाय ६० पश्यन्ग्रस्तंसौम्योघृतमधुतैलक्षयायराज्ञांच भौमःसमरविमर्दंशिखि
कोपंतस्करभयंच ६१ शुक्रःसस्यविमर्दंनानाक्लेशांश्चजनपतिधरित्र्यांरविजः क
रोत्यवृष्टिंदुर्भिक्षंतस्करभयंच ६२ यदशुभमवलोकनाभिरुक्तंग्रहजनितंग्रहणेप्रमो
क्षणेवा सुरपतिगुरुणावलोकितेतच्छममुपयातिजलैरिवाग्निरिद्धः ६३ मुक्तेक्रमान्नि
मित्तैर्पुनर्ग्रहोमासषट्कपरिवृद्ध्यापवनोल्कापातरजः क्षितिकंपतमोशनिनिपातैः ६४
आवंतकाजनपदाःकावेरीनर्मदातटाश्रयिणःदृप्ताश्चमनुजपतयःपीड्यंतेक्षितिसुतेग्र
स्ते ६५ अंतर्वेदंसरयूंनेपालंपूर्वसागरंशोणंस्त्रीनृपयोधकुमारान् सहविद्वद्भि
र्बुधोहंति ६६ ग्रहणोपगतेजीवेविद्वन्नृपमंत्रिहयध्वंसः सिंधुतटवासिनामप्युत्तरदिशि १२

ो ग्रहोऽर्केण चंद्रे
ण वासरे करार्शौ भव
ति नन्नचा विधि प्रोभव
नि तदाच्छादनात्स्या
कस्य सोप्यदृश्यो भ
वति तेन ग्रास इत्युच्य
ते ५९

12

हन्यात् ×२ प्रधान ×२

नां ४७ पर्यंतेषु गृहीत्वा मध्ये पिंडीकृतं तमस्तिष्ठेत् स निरोधो विज्ञेयः प्रमोदकृत्सर्वभू
तानां ४८ अवमर्दनमिति निःशेषमवसंस्याद्यपदि चिरं तिष्ठेत् प्रधानदेशान् भूपांश्च
तिमिरमयः ४९ वृत्तेग्रहे यदि तमस्तत् तत्रामावस्य हस्यते भूयः आरोहणमित्यन्योन्य
मर्दनैर्भयकरं राज्ञां ५० दृप्पणमिवैकदेशे सवाष्पनिःश्वाससमारुतोपहृतं दृश्येत घ्रातं
सुवृष्टिसौस्यावहं जगतः ५१ मध्ये तमः प्रविष्टं वितमस्कं मंडलं च यदि परितः तन्मध्यदे
शनाशं करोति कुक्षामयभयं च ५२ पर्यंतेष्वतिबहुलं स्वल्पं मध्ये तमस्तमोन्याख्यो सस्या
नामीतिभयं भयमस्मिंस्तस्कराणां च ५३ श्वेते क्षेमसुभिक्षं ब्राह्मणपीडां निर्दिशेदहे
अग्निभयमनलवर्णे पीडा च हुताशवृत्तीनां ५४ हरिते रोगोल्बणता सस्यानामीतिभिश्च
विध्वंसः कपिले शीघ्रगमसत्वम्लेच्छध्वंसोथ दुर्भिक्षं ५५ अरुणकिरणानुरूपे दुर्भिक्षा
वृष्ट्यो विहगपीडा आधूम्रे क्षेमसुभिक्षं सादिशेन्मंदवृष्टिं च ५६ कापोतारुणकपिले
श्यामाभे क्षुद्भयं विनिर्देश्यं शूद्राणां व्याधिकरः कापोतकृष्णवर्णश्च ५७ विमलकमणि

ग्रासनिवृत्तेः पुनः ग्रासो भवेत् — एनदोन्या निक — मध्याह्नादीनां — रक्तवरुण इत्यर्थः — अरुणकपिलमिश्र — नीलपीतः

एतदर्कग्रह... भवति ग्राहक... त्वात् ५

१२

रूपोपजीविनिगमज्ञहिरण्यपण्यान् पौण्ड्रोड्रकैकयजनानथचाश्मकांश्च तापसशस्त्य
मेरपोत्रविचित्रवर्षी ७५ वैशाखमासिग्रहणेऽपि नाशमायांति कर्प्यासतिलासमुद्गाइक्ष्वा
कुयौधेयशाकाः कलिंगाः सोपद्रवाः किंतुसुभिक्षमत्र ७६ जेष्ठेनरेंद्रद्विजराजपत्न्यः स

समूलाः

स्यानि वृष्टिश्च महागणाश्च प्रध्वंसमायांति नराश्च सौम्याः साल्वैः समेताश्च निषादसंघाः

कूपादि

७७ आषाढपर्वण्युदपानवप्रनदीप्रवाहान् फलमूलवार्तान् गांधारकाश्मीरपुलिंदचीना

13

न् हतान्वदेन्मंडलवर्षमस्मिन् ७८ काश्मीरान्सपुलिंदचीनयवनान्हन्यात्कुरुक्षेत्रजा

गर्दभान्

न् गांधारानपिमध्यदेशसहितान्दृष्टोग्रहः श्रावणे कांबोजैकशफांश्च शारदमपित्य
क्त्वायथोक्तानिमानन्यत्रप्रचुरान्नहृष्टमनुजैर्धात्रीं करोत्यावृतां ७९ कलिंगवंगान्मगधान्

म्लेच्छान् २

सुराष्ट्रान्सुवीरान्दरदाश्मकांश्च स्त्रीणां च गर्भानसुरो निहंति सुभिक्षकृद्भाद्रपदे प्रदिष्टः ८०

शल्यचिकित्सकैः

कांबोजचीनयवनान्सहशल्यहृद्भिः बाल्हीकसिंधुतटवासिजनांश्च हन्यात् आनर्तपौ
ण्ड्रभिषजश्च तथा किरातान् दृष्टोसुरोश्वयुजि भूरिसुभिक्षकृच्च ८१ हनुकुक्षिपायुमे १२

संश्रितानां च ६७ भृगुतनये राज्ञगते दासेरक केकयास यौधेयाः आर्यावर्त्ताः शिवयः॥ मं २
अर्बुद नाम पर्वत तत्रस्थाजनाः
स्त्रीसचिवगणाश्च पीड्यंते ६८ सौरे मरुभवपुष्करसौराष्ट्राधातवोर्बुदांत्यजनाः गोमंतपा
पर्वत
रियात्राश्रिताश्च नाशं व्रजंत्याशु ६९ कार्त्तिकामम लोपजीविमगधान् प्राच्याधिपान् को
शलान् कल्माषान्यसूरसेनसहितान् काशींश्च संतापयेत् हन्यात्त्वाशु कलिंगदेशन
पतिं सामात्यमस्तं तमो दृष्टं त्रिन्नियतापरंजनयति क्षेमं सुभिक्षान्वितं ७० कास्मीरकान्
कोशलकान् सपुंड्रानृगांश्च हन्यादपरांतिकांश्च येसोमपास्तांश्च निहंति सौम्ये सुवृष्टि
क्षेमसुभिक्षकृच्च ७१ पौषे द्विजक्षत्रजनोपरोधः ससैंधवाख्या कुरुराविदेह ध्वंसं त्र
जंत्यत्र च मंदवृष्टिर्भयं च विद्यात्सुभिक्षयुक्तं ७२ माघे तु मातृपितृभक्तविशिष्टगोत्रान्
स्वाध्यायधर्मनिरतान् करिणस्तुरंगान् वंगांगवासिमनुजांश्च दुनोति राहुः वृष्टिं च कर्षक
जनानुमतां करोति ७३ पीडाकरं फाल्गुनमासि पर्व वंगास्यकावंतकमेकलानां नत्यज्ञ
सस्यप्रवरांगनानां धनुष्करक्षत्रतपस्विनां च ७४ चैत्रे तु चित्रकरलेखकगेयसक्तान्।

१६ वक्रव्याभास्करे पि किं त्वत्र पूर्वा दिक् शशिनि यथा रवौ पश्चिमा कल्प्या ९२ मुक्ते सप्ताहांतः पां
शुनिपातितोऽन्नसंक्षयं कुरुते नीहारो रोगभयं भूकंपः प्रवरनृपमृत्युं ९३ उल्का मंत्रिविना
शं नानावर्णा घनाश्च भयमतुलं स्तनिते गर्भविनाशं (विनाशं) विद्युन्नृपदंष्ट्रिपरिपीडां ९४ परिवेषो रु
क्पीडां दिग्दाहो नृपभयं च साग्निभयं रूक्षो वायुः प्रवलश्चौरसमुत्थं भयं धत्ते ९५ निर्घातः
सुरचापं दंडश्च क्षुद्भयं सपरचक्रं ग्रहयुद्धेन्नृपयुद्धं केतुश्च तदेव संदृष्टः ९६ अविकृतसलि
लनिपातैः सप्ताहांतः सुभिक्षमादेश्यं यच्चाशुभं ग्रहणजं तत्सर्वं नाशमुपयाति ९७ सोमग्रहे नि
वृत्ते पक्षांते यदि भवेद्ग्रहोऽर्कस्य तत्राभयः प्रजानां दंपत्योर्वैरमन्योन्यं ९८ अर्कग्रहात्तु शशि
नो ग्रहणं यदि दृश्यते ततो विप्राः नानाक्रतुफलभाजो भवंति मुदिताः प्रजाश्चैव ९९ इति
श्रीइत्याचार्यश्रीवराहमिहरसंहितायां राहुचारो नाम पंचमोऽध्यायः ५ उष्णमश्रुमुखं व्या
लं लोहिताननमेव च निस्त्रिंशं मुसलं चापि वक्राः पंच कुजस्य च १ यद्युदयर्क्षात् वक्रं करो
ति नवमाष्टमसप्तमर्क्षेषु तदुष्णमुक्तमुदये पीडाकरमग्निवार्त्तानां २ द्वादशदशमैकाद १६

रविकिरणजलद
मरुतांसंघातः ५

15

अत्र यद्यप्यसंभवस्तथा
पि पूर्वशास्त्रानुसारेणोक्तं

वक्रादनंतरं यदार्कमंडलेऽस्तमेष्यति
पुनरपि [illegible]
अत्रेपि ज्ञेयं १

दात्तद्विद्विः संछर्दनं च जरणं च मध्यात्तयोश्च विदरणमिति दशग्राह्यस्य मोक्षाः ८२
अग्नेय्यामपगमनं दक्षिणहनुभेदसंज्ञितं शशिनः सस्यविमर्दो मुखरुक् नृपपीडा स्यात्सुवृ
ष्टिश्च ८३ पूर्वोत्तरेण वामो हनुभेदो नृपकुमारभयदायी मुखरोगं शस्त्रभयं तस्मिन् वि
द्यात्सुभिक्षं च ८४ दक्षिणकुक्षिविभेदो दक्षिणपार्श्वेन यदि भवेन्मोक्षः पीडा नृपपुत्राणाम
भियोज्या दक्षिणा रिपवः ८५ वामस्तु कुक्षिभेदो यद्युत्तरपार्श्वमास्थितो राहुः स्त्रीणां गर्भवि
पत्तिः सस्यानि च तत्र मध्यानि ८६ नैरृत्यवायव्यस्थो दक्षिणवामौ तु पायुभेदौ द्वौ गुह्यरुगल्पवृ
ष्टिर्द्वयोस्तु राज्ञां क्षयो वामे ८७ पूर्वेण प्रग्रहणं कृत्वा प्रागेव चापसर्पणं च। संछर्दनमिति तत्क्षे
मसस्यहार्दप्रदं जगतः ८८ प्राक्प्रग्रहणं यस्मिन् पश्चादपसर्पणं च तज्जरणम् क्षुच्छस्त्रभयोद्वि
ग्नाः कष्टं शरणमुपयांति तत्र जनाः ८९ मध्ये यदि प्रकाशः प्रथमं तन्मध्यविदरणं नाम अंतःको
पकरं स्यात्सुभिक्षदं नातिवृष्टिकरं ९० ~~मध्ये यदि प्रकाशः प्रथमं तन्मध्य~~ पर्यंतेषु विमलता
बहुलं मध्ये तमोऽन्त्यदरणाख्यं मध्यादेशनाशः शारदसस्यक्षयो चास्मिन् ९१ एते सर्वे मोक्षा

स्वयमेवस्त... क्षोभकरं

रक्षा१

१५

चारोदयाःप्रशस्ताः श्रवणमघादित्यमूलहस्तेषु एकपदाश्विविशाखाप्राजापत्येषुचकु
जस्य १३ विपुलविमलमूर्त्तिः किंशुकाशोकवर्णः स्फुटरुचिरमयूखस्तप्तताम्रप्रभाभः
विचरति यदिमार्गंचोत्तरंमेदिनीजः शुभकृदवनिपानांहार्ददश्चप्रजानां १४ इत्याचार्य
श्रीवराहमिहिरसंहितायामंगारकचारो नामषष्ठोऽध्यायः ६ नोत्पातपरित्यक्तःकदाचि
दपिचंद्रजोव्रजत्युदयं जलदहनपवनभयकृत् धान्यार्घक्षयविवृद्ध्यैव १ विचरन्श्र
वणधनिष्ठाप्राजापत्येंदुवैश्वदेवानि मृद्नन् हिमकरतनयःकरोत्यवृष्टिंसरोगभयं
२ रौद्रादीनिमघांतान्युपाश्रिते चंद्रजे प्रजापीडा शस्त्रनिपातक्षुद्भयरोगानावृष्टिसंता
पैः३ हस्तादीन्विचरन् षट्कान्युपपीडयन्गवामशुभः स्नेहरसार्घविवृद्धिंकरोति
चोर्वींप्रभूतान्नां ४ आर्यम्णहौतभुजंभद्रपदामुत्तरांयमेशंच चंद्रस्यसुतोनिघ्नन्प्रा
णभृतांधातुसंक्षयकृत् ५ आश्विनवारुणमूलान्युपमृद्नन्रेवतींचचंद्रसुतःपराप
भिषक्नौजीविकसलिलजतुरगोपघातकरः ६ पूर्वाद्यत्रितयादेकमपींदोःसुतो १५

15

शानत्राग्रवक्रिते कुजेऽश्रुमुखं दूषयति [illegible]नुदये करोति रोगानवृष्टिं च ३ व्यालं त्र
योदशाद्वा चतुर्दशाद्वा विपच्यतेऽस्तमये दंष्ट्रिव्यालमृगेभ्यः करोति पीडां सुभिक्षं च ४ रु
धिराननमिति वक्रं पंचदशात्षोडशाच्च विनिवृत्ते कालमुखरोगं सभयं च सुभिक्षमाव
हति ५ असिमुषलं सप्तदशादष्टादशतोपि वा तदनुवक्रे दस्युगणेभ्यः पीडां करोत्यवृष्टिं
च शस्त्रभयं ६ भाग्यार्यमोदितो यदि निवर्त्तते वैश्वदेवते भौमः प्राजापत्येऽस्तमितस्त्रीन्
लोकान् निपीडयति ७ श्रवणोदितस्य वक्रं पुष्ये मूर्द्धाभिषक्तपीडाकृत् यस्मिन्नृक्षेऽभ्यु
दितस्तद्दिग्व्यूहान्जनानहंति ८ मध्येन यदि मघानां गतागतं लोहितः करोति ततः
पांड्यो नृपो विनश्यति शस्त्रोद्योगोऽनावृष्टिः ९ भित्वा मघां विशाखां भिंदन् भौमः क
रोति दुर्भिक्षं मरकं करोति घोरं यदि भित्वा रोहिणीं याति १० दक्षिणतो रोहिण्याश्चरन्म
हीजोऽर्घवृष्टिनिग्रहकृत् धूमायन्सशिखो वा विनिहन्यात्पारियात्रस्थान् ११ प्राजापत्ये
श्रवणे मूले तिसृषूत्तरासु शाक्रे च विचरन् घननिवहानामुपघातकरः क्ष्मातनयः १२

१६

समाद्येषु १७ दृष्टोभयायजगतःशुभफलकृत्प्रोषितस्तेषु २७ पौषेकरोतिडमरंमाघे
वातंतथाचचंद्रसुतः वैशाखेजनमरकंआषाढेश्रावणेचदुर्भिक्षं १८ कार्त्तिकेश्वयुजि
वायदिमासेदृश्यतेतनुभवःशिशिरांशोः शास्त्रचौरकृतभुक्नृपरोगक्षुद्भयानिचतदा
विदधाति १९ रक्तानिसौम्येस्तमितेपुराणियान्युत्सृजतेतान्युयांतिमोक्षं अन्येतुपश्चा
दुदितेवदंतिलाभःपुराणांभवतीतितज्ज्ञाः २० हेमकांतिरथवाशुकवर्णः सस्यकेनम
णिनासदृशोवा स्निग्धमूर्त्तिरलघुश्चहितायव्यत्ययेनशुभकृत्शशिपुत्रः २१ इत्याचा
र्यश्रीवराहमिहरसंहितायांबुधचारोनामसप्तमोध्यायः ७ नक्षत्रेणसहोदयमस्तंसंज्ञं
वक्तव्यंवर्षंमासक्रमेणैव १ प्रवासांतेसहस्रैणउदितोयुगपत्त्वरेत् तस्मात्कालाद्दद्द
पूर्वोगुरोरब्दःप्रवर्त्तते २ वर्षाणिकार्त्तिकादीन्याग्नेयाद्भद्वयानुयोगीनि क्रमशस्त्रिभं
तुपंचममुपांत्यमंत्यंचयद्वर्षं ३ शकटानलोपजीवकगोपीडाव्याधिशस्त्रकोपश्च वृद्धि
स्तुरक्तपीतककुसुमानांकार्त्तिकेवर्षे ४ सौम्येब्देनावृष्टिर्मृगाखुशलभांडजैश्चसस्यव १६

Marginal and interlinear notes: उदितः ; प्रसंगतः ; शत्रुभिर्वितानि ; नगराणि ; नीलवर्णः ; नीलवर्णमरकतसदृशः ; पश्चादुदितेपुररोह्मणां पुरलाभः प्रागुदिते पुरस्थोह्नाः एवंवदंति ५ ; नत्ररोह्लरोचलंनीयर्यः ४ ; मस्तंयायेनयाति सुरमंत्री ५

येषांद्रुमाणांरक्तपीतकुसुमा भवंतितेषां

16

विमर्दी यात्सुत शस्त्रतस्करामयभयप्रदायी चरन् जगतः ७ प्राकृतविमिश्रसंक्षिप्त तीक्ष्णायोगांत घोरपापाख्याः सप्तपराशरतंत्रेन तत्रैः कीर्तितागतयः ८ प्राकृतसंज्ञा वायव्ययाम्यपैतामहानि वर्क्ष्णात्मिश्रागतिः प्रदिष्टा शशिशिवपितृभुजंगदेवानि ९ संक्षिप्तायां पुष्पः पुनर्वसुः फाल्गुनीद्वयं चैव तीक्ष्णायोगप्रदावयं सशक्राश्विवुक्योः सं १० योगांतिकेति मूलं द्वे चांषाढे गतिः सुतस्येंदोः घोराश्रवणं त्वाष्ट्रं वसुदेवं वारुणं चैव ११ पापाख्यासा वित्रं मैत्रं चंद्राग्निदैवतं चेति उदयप्रवासदिवसैः सरावृगतिलक्षणं प्राह १२ चत्वारिंशत् ३० द्विसमेता विंशति २२ द्विनवकं चनव ५ मासार्द्ध १५ दशाचैकसंयुता ११ प्राक्तनतार्णां १३ प्राकृतगत्यामारोग्यवृष्टिसस्यप्रवृद्धयः क्षेमं संक्षिप्त मिश्रयो र्मिश्रमेतदन्यासु विपरीतं १४ ऋजुरतिवक्रा वक्रा विकला चमतेनदेवलस्यैता पंचपंच तु ५ चे २ का १ हाश्चादीनां षड्भेस्ता १५ ऋज्वी हिता प्रजानामतिवक्रार्घविनाशाय ति शस्त्रभयदा च वक्रा विकला भयरोगसंजननी १६ पौषाषाढश्रावणवैशाखेष्विंदुजः

एकानि चत्वारिंशतादीनि प्राक्तन ... मध्ये ...
चप्रसारं तद्यथा प्राकृतायां गतौ स्थितउदितनदा चत्वारिंशद्दि
नानि उदितत्व वृत्ति स्थितिरवं मिश्रायां त्रिंशत् एवमेव एतद्गणिते
...

एकान्यत्मे ... प्राकृतगत्यां स्थि ... वति २ एवमग्रे

१०त्रिंशत् ४७

दयप्रवासदिवसैरि नुवर्ततेयदा बुधः शद्दिनानि उदितः स्थितो वा तिष्ठति दा ऋज्वी नाम बुध गतिः एवमन्येषा पिवोध्यं

१७

ग्यसुभिक्षं क्षेमकरो वाक्पतिश्चरन्निभानां याम्येन विपरीतो मध्येन तु मध्यफलदायी १५ वि
चरन्भद्वयमिष्टस्तस्मात्संवत्सरेण मध्यफलः सस्यानां विध्वंसी विचरेदधिकं यदि कदाचि
त् १६ अनलभयमनलवर्णे व्याधिः पीते रणागमः श्यामे हरिते च तस्करेभ्यः पीडा रक्ते
च शस्त्रभयं १७ धूमाभे नावृष्टिस्त्रिदशगुरौ नृपवधो दिवा दृष्टे विपुलेऽमले सुतारे रात्रौ
दृष्टे नृपाः स्वस्थाः १८ रोहिण्योऽनलभं च वत्सरतनुः नाभिस्त्वषाढाद्वयं सार्प्यं हृत्पित्र्यदैवतं
च कुसुमं शुद्धैः समेतैः फलं देहे क्रूरनिपीडितेऽग्न्यनिलजं नाभ्यां भयं क्षुत्कृतं पुष्पे मूलफ
लक्षयोऽथ हृदये सस्यप्रणाशो ध्रुवं १९ गतानि वर्षाणि शकेन्द्रकालात् हतानि रुद्रै ११
र्गुणयेच्चतुर्भिः ४ नवाष्टपंचाष्ट ८५८९ युतानि कृत्वा विभाजयेत् शून्यशरागरामैः ३७
५०॥ लब्धेन युक्तं शककभूपकालं संशोध्य षष्ट्या ६० विषयैर्विभज्य युगानि नाराय
णपूर्वकाणि लब्धानि शेषाः क्रमशः समास्युः २१ एकैकमब्दं नवभि ९ र्हतेषु दत्त्वा प
थग्द्वादश १२ कं क्रमेण हत्वा चतुर्भि ४ र्वसुदेवताद्यान्युडूनि शेषांशकपूर्वमब्दं २२

[Interlinear glosses: नक्षत्रद्वयं; नक्षत्रतारे दृष्टे; शुभेलो ...; ...]

वर्तमानषष्ठ्यब्दस्य ये गताः सविकलाद्याः ... पृथक् स्थापिताः ... नवभिर्गुणयेत् ... द्वितीय २
स्थानस्थो वर्तमानषष्ठ्यब्दस्य गतवर्षेभ्यः द्वादशभागवर्षादिकं ... नवगुणितेषु ... संयोजयेत् ... चतुर्भि २
र्भागमपहृत्य यल्लब्धं तानि न... [illegible] ...भागमपहृत्याप्तांशकेषु ... २
निवृत्ति ... कल्पनं चतुर्भिर्भागे हृते ... पूर्वकं ... २
... चतुर्भिर्भागे गुरुला... वर्तमानात् ... प्रत्ययिति २ ... [illegible]

घः व्याधिभयं मित्रैरपि भूपानां जायते वैरं शुभकृज्जगतः पौषे निवृत्तवैराः परस्परं
क्षितिपाः वृद्धिं गुणाधान्यार्घः पौष्टिककर्मप्रवृद्धिश्च ६ पितृपूजापरिवृद्धिर्माघे हार्दिश्च
सर्वभूतानां आरोग्यवृष्टिधान्यार्घः संपदो मित्रलाभश्च ७ फाल्गुनवर्षे विद्यात्क्वचित्क्वचिद्
भवृष्टिसस्यानि दौर्भाग्यप्रमदनाप्रवराश्चौरानृपाश्चोग्राः ७ चैत्रे मंदावृष्टिः प्रियमन्नं
मर्मं वनिपामरद्वः रद्धिश्च कोशधान्यस्य भवति पीडा च रूपवतां ८ वैशाखे धर्मपरावि
गतभयाः प्रमुदिताः प्रजासनृपाः यज्ञक्रियाप्रवृत्तिर्निष्पत्तिः सर्वसस्यानां ९ ज्येष्ठे जाति
कुलधनश्रेणीश्रेष्ठानृपाः सधर्मज्ञा पीड्यंते धान्यानि च हित्वा कंगुशमीजातिं १० आषाढे
जायंते सस्यानि क्वचिद्वृष्टिरन्यत्र योगक्षेमं मध्यं व्यग्राश्च भवंति भूपालाः श्रावणवर्षे क्षेमं
सम्यक् सस्यानि वृद्धिमायांति क्षुद्रा ये पाषंडा पीड्यंते ये च तद्भक्ताः १२ भाद्रपदे वल्लीजं
निष्पत्तिं याति पूर्वसस्यं च न भवत्यरं सस्यं क्वचित्सुभिक्षं क्वचिच्च भयं १३ आश्वियुजेऽषे ज
स्त्रपतति जलं प्रमुदिताः प्रजाः क्षेमं चारोग्यं च याया मत्ता सर्वेषामन्नबाहुल्यं १४ उदगारो

कृतानुकारं कुरुतः प्रजानां प्रायः प्रमाथी वृषविक्रमौ तु सुभिक्षदौ रोगभयप्रदौ च ३४ अष्टं चतुर्थे × ५

१८ अद्यो गिरा श्रीमुखभावसंज्ञौ युवाथधाता त्रियुगे द्वितीये वर्षाणि पंचैव यथाक्रमेण त्रीण्य
(श्रीअंगिराश्रीमुखभावर्षे) (उपद्रवः)
त्र शस्तानि समे परे द्वे ३१ त्रिष्वाद्यवर्षेषु निकामवर्षी देवो निरातंकभयश्च लोकः अब्दद्व
येत्येपि समासु वृष्टिः किं त्वत्र रोगाः समरागमश्च ३२ त्वाष्ट्रे युगे पूर्वमथेश्वराख्यं वर्षं द्वि
तीयं बहुधान्यमाहुः प्रमाथिनं विक्रममप्यथान्यत् वृषं च विद्यात् गुरुचारयोगात् ३३
आद्यं द्वितीयं च शुभे त्र वर्षे ॅ स्य युगस्य पूर्वं यच्चित्रभानुं कथयंति वर्षं मध्यं द्वितीयं च शुभा
नुसंज्ञं रोगप्रदं मत्सुकरं न तच्च ३५ तारणं तदनु भूरिवारिदं सस्यवृद्धिमुदितातिपार्थि
वं पंचमं व्ययमुशंति शोभनं मन्मथप्रबलमुत्सवाकुलं ३६ त्वाष्ट्रे युगे सर्वजिदाद्यव
क्तः संवत्सरोन्यः खलु सर्वधारी तस्माद्विरोधी विकृतः खरश्च शस्तो द्वितीयोत्र भयाप
७३ हो षाः ३७ नंदनो विजयो जयस्तथा मन्मथोथ परश्च दुर्मुखः कांतमत्र युग आदितस्त्र
यं मन्मथः सफलो धर्मपरः ३८ हेमलंब इति सत् कृतानुकारं कुरुतः प्रजानां प्रायः
प्रमाथी वृषविक्रमौ तु सुभिक्षदौ रोगभयप्रदौ च ३४ अष्टं चतुर्थे त्रमे युगे स्याद्विलंवि १८

18

विष्णुः सुरेज्यो बलिभिद्धुताशस्त्वष्टोत्तराप्रोष्ठपदाभिधाश्च क्रमात् युगेशाः पितृविश्वसो
मशक्रानिलाख्याश्विभगाः प्रदिष्टाः २३ संवत्सरोऽग्निः परिवत्सरोऽर्कः इदादिकः शीत
मयूखमाली प्रजापतिश्चाप्यनुवत्सरः स्यादिद्वत्सरः शैलसुतापतिश्च २४ वृष्टिः समा
द्ये प्रमुखे द्वितीये प्रभूततोया कथिता तृतीये पश्चाज्जलं मुंचति यच्चतुर्थः स्वल्पोदकं पंच
मवर्षमुक्तं २५ चत्वारि मुख्यानि युगान्यथैषां विड्जीवान लद्वैवतानि चत्वारि मध्यानि
च मध्यमानि चत्वारि चांत्यान्यधमानि विंद्यात् २६ आद्यं धनिष्ठांशमभिप्रवृत्तो माघे यदा
यात्युदयं सुरेज्यः षष्ट्यब्दपूर्वः प्रभवः स नाम्ना प्रवर्त्तते भूतहितस्तदाब्दः २७
... क्वचिद्वृष्टिः पवनाग्निकोपः संतीतयः श्लेष्मकृताश्च रोगाः संवत्सरेऽस्मिन् प्रथमे प्रवृ
त्ते न दुःखमाप्नोति जनस्तथापि २८ तस्माद्द्वितीयो विभवः प्रदिष्टः शुक्लस्तृतीयः परतः प्रमोदः
प्रजापतिस्त्वथोत्तराणि शस्तानि वर्षाणि फलानि चैषां २९ निष्पन्नशालीक्षुयवादिसस्यां
भयैर्विमुक्तामुपशांतवैरां संहृष्टलोकां कलिदोषमुक्तां क्षत्रं तदा शास्ति च भूतधात्रीं ३०

ज्ञाः खलु दुर्मेति च आद्ये तु वर्षे महती सचौराश्चासौ हनूकंप युतश्च कामेः ४७ विक्रमः सकललोकनंदनो नाराक्षसात्यकरो नलस्तथापी भध्यान्यजननोत्र राक्षसोवङ्किकोपम रकप्रदोनलः ४८ यत्कालयुक्तः तदनेकदोषदः सिद्धार्थसंज्ञे बहवो गुणाश्च रौद्रोतिरौद्रः क्षयकृत्प्रदिष्टो योदुर्मेतिमध्यम वृष्टिहर्षः ४९ भाग्येयुगेदुंदुभिसंज्ञमाद्यं सस्यस्य वृद्धिमहतींकरोति उद्गारिसंज्ञं तदनुक्षयाय नरेश्वराणां विषमा च वृष्टिः ५० रक्ताक्षमुष्टं कथितं तृतीयं तस्मिन्भयं दंष्ट्रि तथाग दाश्च क्रोधं वक्रक्रोधपरं प्रदिष्टं राष्ट्राश्च सून्याकुरुते विरोधैः ५१ क्षयमिति युगस्यांत्यस्यांत्यं वक्रक्षयकारकं जनयति भयं तद्विप्राणां कृषीवलवृधिदं उपचयकरं विट्शूद्राणां परस्वहृतां तथा कथितमखिलं षष्ट्यब्दे यत्तदत्र समासतः ५२ अकलुषांशुजटिलः पृथुमूर्तिः कुमुदकुंदकुसुमस्फटिकाभः ग्रहहतोनयदि सत्पथवर्ती हितकरोऽमरगुरुर्मनुजानां ५३ इत्याचार्यश्रीवराहमिहरसंहितायांगुरुचारोनामाष्टमोध्यायः ८ नागगजैरावतवृषभगोजरद्गवमृगाजदहनाख्याः अश्वि

13 १९

परतोविकारिच सर्वरीतितदनुप्लवः स्मृतोवत्सरोगुरुवसेनपंचमः ३९ ईतिप्रायाःप्रचुर
पवनावृष्टिरग्रेत्रपूर्वे मंदंसस्यंनवकुसलिलंवत्सरेतोद्वितीये अत्युद्वेगःप्रचुरसलिलः
स्यात्तृतीयश्चतुर्थो दुर्भिक्षायप्लवइतिततः सौम्यनोभूरितोयः ४० वैश्वेयुगेशोभकृदित्य
याद्यः संवत्सरोततःशुभकृद्वितीयः क्रोधीततृतीयःपरतःक्रमेण विश्वावसुश्चेतिपराभवश्च ४१
पूर्वापरौप्रीतिकरौजनानामेषांतृतीयोबहुदोषदोष्टः अंत्योसमोकिंतुपराभवेग्निःशस्त्राभ
यार्त्तिर्द्विजगोभयंच ४२ अथप्लवंगोनवमेयुगेष्टःस्यात्कीलकोन्यःपरतश्चसौम्यः साधार
णोरोधकृदित्यथैवंशुभप्रदौकीलकसौम्यसंज्ञौ ४३ कष्टःप्लवंगोबहुशःप्रजानांसाधारणोल्प
जलमीतयश्च यःपंचमोरोधकृदित्यथाद्यः स्त्रिग्धंजलंतत्रचसस्यसंपत् ४४ इंद्राग्निदैवं
दशमंयुगंतत्राद्यमब्दंपरिधाविसंज्ञं प्रमाथिकं विक्रममित्यथान्यत्स्यादानंदसंज्ञं नलसंज्ञ
कंच ४५ परिधावि[illegible]निमध्यदेशनाशोन्रप[illegible]हानिर्जलमल्पमग्निकोपः अलसास्तु
जनाःप्रमाथिसंज्ञेडमररंक्तकपुष्पबीजनाशः ४६ एकादशेपिंगलकालयुक्तसिद्धार्थरौ

२०

भद्रांश्च सूरसेनकयौधेयककोटिवर्षनृपान् ११ भचतुष्टयमाग्नेयं द्वितीयमसितां बुस
स्यसंपत्यै विप्राणामशुभकरं विशेषतः क्रूरचेष्टानां १२ श्रवणेनांत्राक्रांते म्लेच्छाटविका
न् श्वजीविगोमंतः गोनिंदिनीचशूद्रान् वैदेहांश्चानयः स्पृशति १३ विचरन् मघादिपंच
कमुदितः सस्यप्रणाशकृच्छुक्रः क्षुत्तस्करभयजननो नीचोन्नतिशंकरकरश्च १४ पि
त्र्याद्यं वर्षभौ हंत्यश्मकनाविकान् शावरभूद्रान् पौंड्रापरांत्यमूलिकवनवासिद्रविड
सामुद्रान् १५ स्वात्याद्यं भत्रितयं मंडलमेतच्चतुर्थमभयकरं ब्रह्मक्षत्रसुभिक्षाभिवृ
द्धये मित्रभेदाय १६ अत्राक्रांते मृत्युः किरातभर्तुः पिनष्टि चेक्ष्वाकून् प्रत्यंतावंत्यपुलिं
दवकरणान्स्वरसेनांश्च १७ ज्येष्ठाद्यं पंचर्क्षं क्षुत्तस्कररोगदं प्रबाधयते काश्मीराश्म
कमत्स्यान् सचारुदेवीमवंतींच १८ चारोहेत्राभीरान्द्रविडांवष्टत्रिगर्त्तसौराष्ट्रान् ना
शयति सिंधुसौवीरकांश्च काशीश्वरस्य वधः १९ षष्टं षण्नक्षत्रं शुभमेतन्मंडलं धनिष्ठा
द्यं भूरिधनगोकुलाकुलमनल्पधान्यं क्वचित्सभयं २० अत्रारोहेत् शूलिकगांधारार २०

कथिताः १

आचार्यमतं १ स्वा भ ५ रोहिणीनः गजाद्याः

न्याद्याः कैश्चित्त्रिभाः क्रमाद्वीथयः १ नागा तु पवनयाम्यानलानि पैतामहात्त्रिभास्तिस्रः
गोवीथ्यामश्विन्यः पौष्णं द्वे चापि भद्रपदे २ जारद्गव्यां श्रवणात्त्रिभं मृगाख्या त्रिभं च मैत्रा(
द्यं हस्तविशाखात्वाष्ट्राण्यजे त्वषाढाद्वयं दहना ३ तिस्रस्तिस्रस्तासां क्रमादुदग्मध्यया
म्यमार्गस्थाः तासामप्युत्तरमध्यदक्षिणावस्थितैकैका ४ वीथीमार्गानपरे कथयंति य
था स्थिता नभमार्गस्य नक्षत्राणां ताराया म्योत्तरमध्यमास्तद्वत् ५ उत्तरमार्गो याम्यादिनिग
दितो मध्यमः सुभाग्याद्यः दक्षिणमार्गोषाढादिकेश्चिदेवं कृता मार्गाः ६ ज्योतिषमागम
शास्त्रं विप्रतिपत्तौ न योग्यमस्माकं स्वयमेव विकल्पयितुं किंतु बहूनां मतं वक्ष्ये ७ उत्तर
वीथीषु सितः सुभिक्षशिवकृत्तोस्तमुदयं वा मध्यासु मध्यमफलः कष्टफलो दक्षिणा(
स्यासु ८ उत्तमोत्तमोनं समममध्यन्यूनं मध्यमकष्टं कष्टं कष्टतमं उदगाद्यासु यथाक्र
ममेवं फलं ब्रूयात् ९ भरणी पूर्वं मंडलमृक्षचतुष्कं सुभिक्षकरमाद्यं वंगांगमहिषवा
ल्हिककलिंगदेशेषु भयजननं १० अत्रोदितमारोहेत् ग्रहोपरो पदि सितं ततो हन्यात्(

यथा नागा उ
रागजा उत
नारस्वना
क्षिराग ४



प्रथमऋक्षचतुष्कंमंडलमिति भवतीत्यर्थः २

सुदृषि: वणिजांचभयंविजानीयात् ३१ भेत्रेतत्रविरोधोजेषायांतत्रमुखसंताप: मौलिकभिषजां मूलेत्रिष्वपिचैतेघनावृष्टि: ३२ आप्येसलिलजपीडाविश्वेशोव्याधय: प्रकुप्यंति श्रवणेश्रवणव्याधि: पाषंडिभयंधनिष्टायां ३३ सत्तभिषजिशौंडिकानामजेकभेघूतजीविनांपीडा कुरुपांचालानामपिकरोतिचास्मिन् सित: सलिलं ३४ आहिर्बुध्नेफलमूलतापकृतयायिनांचरेवत्यां अश्विन्यांहयपानांयाम्येतुकिरातयवनानां ३५ चतुर्दशेपंचदशेतथाष्टमेत्तिमि श्रपत्तस्यतिथौसगोसुत: युगाद्यजेदर्शनमस्तमेतिवातदामहीवारिमयीचलत्यते ३६ गुरुर्भगुश्चापरपूर्वकाष्टयो: परस्परंसप्तमराशिगोयदा तदाभजारुग्भयशोकपीडितानवारिपश्यंतिपुरंदरोज्झितं ३७ यदास्थिताजीववुधारसूर्यजा: सितस्यसर्वेऽपथानुवर्तिन: २ नागविद्याधरसंगरास्तदाभवंतिवाताश्चसमुद्धितांतका: ३८ नमित्रभावेसुहृदोव्यवस्थितारूम्लेछविडालकुंजरा: खरामहिष्योसितधान्यशूकरा: पुलिंदशूद्राश्चसदक्षिणापथा: क्षयंव्रजंत्यक्षतरोगमृत्युभि: ४० कपासुस २९

कपासुसम्यक्निरताद्विजातय: नचाल्पमप्यंबुददातिवासवोऽपिनंतिवजेराशिरांसिभ्रम्यतो ३९ शनैश्च × २

[Marginal notes: मूदुसविरूपायिणां १; सुहृद: मित्रीभावमजंति; एक: पूर्वकाष्ठायां अपर: पश्चिमकाष्ठायां; अग्यपानी; उदयास्तसमये वासवयोर्योग: नान्यत्रा ५; ...यत्ककास्पतिथिकुज ...दयफलमाह ६; ...तरक्षपानकार; अग्रत: स्थिते]

समस्तदिवसंहृष्टः
शुक्रोगकृत् २

वंतयः प्रपीड्यंते वैदेहवधः प्रत्यंतयवनशाकदासपरिवृद्धिः २१ अपरस्यां त्वाष्ट्राद्यं ज्ये
ष्ठाद्यं चापि मंडलं शुभदं पित्र्याद्यं पूर्वस्यां शेषाणि यथोक्तफलदानि २२ दृष्टोऽनस्तमितेऽर्के
भयकृत्तु रोगकृत्समस्तमहः अर्द्धदिवसे च संदृष्टो नृपबलपुरभेदकृच्छुक्रः २३ भिंदन् गतो
नलर्क्षं कूलानि कांतवारितोहानिः अव्यक्ततुंगनिम्ना समा सरिद्भिर्भवति धात्री २४ प्राजा
पत्ये शकटे भिन्ने कृत्वेव पातकं वसुधा केशास्थिशकलशबला कापालमिव व्रतं धत्ते २५
सौम्योपगतो रसस्यशोषणः समुद्दिष्टः आर्द्रागतस्तु कोशलकलिंगहासलिलकरनिकरः
२६ अश्मकवैदर्भाणां पुनर्वसुस्थे सिते महाननयः पुष्ये पुष्टा वृद्धिर्विद्याधरगणविमर्दश्च
२७ आश्लेषासु भुजंगमदारुणपीडावहश्चरन् शुक्रः भिंदन् मघां महामात्रदोषकृद्भूरिवृष्टिक
रः २८ भाग्येशवरपुलिंदप्रध्वंसकरोंबुनिवहमोक्षाय आर्यम्णो कुरुजांगलपांचालघ्नः
सलिलदायी २९ कौरवचित्रकराणां हस्ते पीडा जलस्य च निरोधः रोगकदंडजपीडा चि
त्रास्थे शोभना वृष्टिः ३० स्वातौ प्रभूतवृष्टिः दूतवणिङ्नाविकान् स्पृशत्यनयः ऐन्द्राग्नेपि

सूर्यसिद्धांते विष्टे
रा द्वितीयाद्धर्गिको
भमस्यसप्तदशमा
यस्पष्टस्य स्वया
मिनमिशकटसरो
रूपा १शकटभेद
तीन कार्ये रुढं २

संक्ष ६



रूप २

२२ न्यं कुरुते चाल्पं तृणं न वक्रज्जायते तत्र ६७ इत्याचार्यश्रीवराहमिहरसंहितायां शुक्रचारो नाम नवमोध्यायः ९ श्रवणानिलहस्तार्द्रा भरणीभाग्योपगः सुतोर्कस्य प्रचुरसलिलोपगूहां करोति वसुधां यदि स्निग्धः १ अहिवरुणपुरंदरदैवतेषु सौम्यः सुखमत्यतिजलं च कुरुते शस्त्राद्दृष्टिकरो मूलेप्यत्येकमपिचह्नः २ तुरगतुरगोपचारककविवैद्यामात्यहार्कजोश्विगतः याम्येनर्त्तकवादकगेयज्ञक्षुद्रनैकृताः ३ बहुलास्थे पीड्यंते सौरेग्न्युपजीवनश्चमूपाश्च रोहिण्यां कोशलमद्रिकाशिपांचालशाकटिकाः ५ मृगशिरसि वस्त्रयाजकयजमानार्यजनमध्यदेशाश्च रौद्रस्थे पारतरामठतैलिकारजकचौराश्च ५ आदित्ये पांचनदप्रत्यंतसुराष्ट्रसिंधुसौवीराः पुष्ये घांटिकघोषिकपारावतवणिक्कितवकुसुमानि ६ सार्प्ये जलरुहसर्पाः पित्र्ये वाल्हीकचीनगांधाराः शूलिकपारतवैश्याः कोष्ठागाराणि वणिजश्च ७ भाग्ये रसविक्रयिणः पुण्यस्त्री कन्यका महाराष्ट्राः आर्यम्णो गुडलवणभिक्षुकांबुनि तक्षशिला ८ हस्ते नापितचाक्रिकचौरभिषक्सूचिकद्विपग्राहावंधक्यः कोशलकामला २२

भ्यकुनिरता द्विजातयः नचाल्पमप्यंबु ददाति वासवो भिनत्ति वज्रेण शिरांसि निहंति शुक्रः
क्षितेजेयजन्ततः प्रजां कृताशशास्त्रचतुर्द्दव्यषितस्करैः चराचरं व्यक्तमयोत्तरापथं दिशोर
जोल्कादहनैश्च पीडयेत् ५१ बृहस्पतौ हंति पुरः स्थिते सितः सितं समस्तं द्विजगोसुरा
लयं दिशं च पूर्वां करकासृजो ब्रुदा गलेगदा भूरि भवेच्च शारदं ५२ सौम्योस्तोदययोः पुरो
भृगुसुतस्यावस्थितस्तोयकृत् रोगान्कामलपित्तजांश्च कुरुते पुष्णाति ग्रैष्मकान् हन्यात्सव्र
जिताग्निहोत्रिकभिषक् रंगोपजीवान् हयान् वैश्यान्गाः सहवाहनैर्नरपतीन् पीतां पश्चा
द्दिशं ५३ शिखिभयमनलाभैश्शस्त्रकोपश्च रक्ते कनकनिषकगौरे व्याधयो दैत्यपूज्ये हरि
तकपिलरूपे श्वासकासप्रकोपः नपतति सलिलं रवाङ्गस्मरुत्ता भिताभे ५४ दधिकुमुदश
शांककांतिभृत्स्फुटविकसत्किरणो बृहत्तनुः सुगतिरविकृतो जयान्वितः कृतयुगरू
पकरः सितोदयः ५५ आरविशुक्रो याम्यां दिशि स्थितो ल्पजलं सृजति निसंधान्यं च भूरि कु
रुते तृणां चवक्र जायते तत्र ५६ अपरां निषेवमाणः काष्ठांशुक्रो जलं सृजति भूरि धा

खंडजद्वार विजो यदि चित्रः क्षुद्भयकृद्यदि पीतमयूखः शस्त्रभयाय च रक्तसवर्णो भस्मनि
भो बहुवैरकरश्च २० वैडूर्यकांतिरमलः शुभदः प्रजानां बाणातसीकुसुमवर्णनिभश्च शस्तः
यं चापि वर्णमुपगच्छति तत्सवर्णान् सूर्यात्मजः क्षपयतीति मुनिप्रवादः २१ इत्याचार्यश्रीवरा
हमिहरसंहितायां शनैश्चरचारो दशमोध्यायः १० गार्गीयं शिखिचारं पाराशरं देवल
कृतं च अन्यांश्च बहून्दृष्ट्वा क्रियतेयमनाकुलश्चारः १ दर्शनमस्तमयो वा न गणितवि
धिनास्य शक्यते ज्ञातुं दिव्यान्तरिक्षभौमास्त्रिविधाः स्युः केतवो यस्मात् २ अहुताशेनल
रूपं यस्मिंस्तत्केतुरूपमेवोक्तं खद्योतपिशाचालयमणिरत्नादीन्परित्यज्य ३ ध्वजश
स्त्रभवनतरुतुरंगकुंजराद्येष्वथांतरिक्षास्ते दिव्या नक्षत्रस्था भौमाः स्युरतोन्यथा शिखि
नः ४ शतमेकाधिकमेके सहस्रमपरे वदंति केतूनां बहुरूपमेकमेव प्राह मुनिर्ना
रदः केतुं ५ यद्येको यदि बहवः किमनेन फलं सर्वथा वाच्यं उदयास्तमयैः स्थानैः स्प
र्शेराधूमनेर्वर्णैः ६ यावंत्यहानि दृश्यो मासास्तावंत एव फलपाकः मासैरब्दानि वदेत्प्रथ



दै

सम्भूयैवानीयंतेतत्रयेपूर्वतिले २ कुंभकाराः ३

संमंत्रिचक्रैचराः ३

चौनर

रथयः कथाश्रावकाः २

काराश्चपीड्यंते ९ चित्रास्येवमदाजनलेखकचित्रज्ञचित्रभांडानि स्वातौमागधचरदूत
सूतश्लवनद्याः १० ऐंद्राग्न्याख्येत्रैगर्त्तचीनकौलूतकुंकुमंलाक्षासस्यान्यपमंजिष्ठाकौसुंभं
चक्षयंयांति ११ मैत्रेकुलूततंगणखससकाश्मीराः उपतापंयांतिचघांटिकामेदश्चमित्राणां
१२ ज्येष्ठासुनृपपुरोहितनृपसत्कृतशूरगणकुलश्रेणयः मूलेतुकाशिकौशलपांचालफलौ
षधीयोधाः १३ आप्येंगवंगकोशलगिरिव्रजामगधपौंड्रमिथिलाश्चसर्वउपतापंयांतिज
नावसंतियेताम्रलिप्ताश्च १४ विश्वेश्वरेर्कपुत्रश्चरन्दशार्णोन्निहंतियवनांश्चउज्जयनीं
शवरान्पारियात्रिकान्कुंतिभोजांश्च १५ श्रवणेराज्याधिकृतान्विप्राग्र्यान्भिषक्पुरो
हितकलिंगान् वसुभेमगधेशजयोह्निश्चधनेश्वरकृतानां १६ सार्जेशततभिषजिभिषक्
कविशौंडिकपण्यनीतिवल्लीनांआहिर्बुध्नेनद्योपानकरास्त्रीहिरण्यंच १७ रेवत्यांराजभृ
ताक्रौंचद्वीपाश्रिताःशारदसस्यं शबरांश्चनिपीड्यंतेयवनांश्चशनैश्चरेचरति १८ यदाविशाखा
सुमहेंद्रमंत्रीसुतश्चभानोर्दहनर्क्षयातः तदाप्रजानामनयोतिघोरःपुरप्रभेदोगतयोर्भमेकं १९

२५

२५ न तारकास्ते स्निग्धाश्च भवंति तीव्रफला: १७ स्निग्धा: प्रभासमेता: द्विशिखा: षष्टिःशानै श्चरांगरुहा: अतिकष्टफलाः दृश्या: सर्वे ते कनकसंज्ञा: १८ विकचानाम गुरुसुता: सितैकतारा: शिखापरित्यक्ता: षष्टि: पंचभिरधिका स्निग्धा याम्याश्रिता: पापा: १९ नाति व्यक्ता: सूक्ष्मादीर्घाः शुक्ला यथेष्ट दिक्प्रभवा: बुधजास्तस्करसंज्ञा: पापफला: त्वेकपंचा शात् २० क्षतजानलानुरूपास्त्रिचूलतारा: कुजात्मजा: षष्टिनाम्ना च कौंकुमा: सौम्याशा संस्थिता पापा: २१ त्रिंशत्र्यधिका राहो: स्ते तामसकीलका इति ख्याता: रविशशिगा दृश्यं ते तेषां फलमं क्षचारोक्तं २२ विंशत्यधिकमन्यत् शतमग्ने विश्वरूपसंज्ञानां तीव्रानलभयदानां ज्वालामालाकुलतनूनां २३ श्यामारुणा वितारा श्चामररूपा विकीर्णदीधतयः अरुणाख्या वायो: सुता: सप्तसप्तति: पापदा: परुषा: २४ तारापुंजनिकाशा गणकाना मप्रजापतेरष्टौ ब्रह्मशतं चतुरधिके चतुरस्त्रा ब्रह्मसंताना: २५ कंकानाम वरुणजाद्वात्रिंशद्वंशगुल्मसंस्थाना: शशिवत्प्रभासमेतास्तीव्रफला: केतव: प्रोक्ता: २६ षण्णव २५

पंचचत्वारिंशद्दिनानिनिः फलानि ततऊर्ध्वंमासादीन्वदेत् २

अचिरसंस्थितः शीघ्रमेवद र्शनंयाति

चिरं १

एषांमध्यादेकएवदृश्यतेनसर्वेयुगपत् इतिसर्वत्रैवपरिभाषा २

नवीनं करोति १

थमात्यत्तत्रयात्यरत्नः ७ ह्रस्वस्तनुःप्रसन्नस्निग्धरसंस्थितःशुक्लः उदितौवाप्यभिवृष्ट

सुभिक्षसौख्यावहकेतुः ८ उक्तविपरीतरूपोनशुभकरोधूमकेतुरित्युक्तः इंद्रायुधानुका

रीविशेषतोद्वित्रचूलोवा ९ हारमणिहेमरूपाःकिरणाख्याःपंचविंशतिःसशिखाःप्रागपर

वि ४ दिशोर्दृश्या नृपतिरोधावहारविजाः १० शुकदहनबंधुजीवकलाक्षक्षतजोपमाहुताशसु

ताः आग्नेय्यांदृश्यंतेतावंतस्तेपिशिखिभयदाः ११ वक्रशिखामृत्युसुतारूक्षाःकृष्णाश्चतेपिता

वंतः दृश्यंतेयाम्यायांजनमरकावेदिनस्तेपि १२ दर्पणवृत्ताकाराविशिखाःकिरणान्वि

ताधरातनयाःक्षुद्भयदाद्वाविंशतिरैशान्यामंबुतैलनिभाः १३ शशिकिरणरजतहिमकुमु

दकुंदकुसुमोपमाःसुताःशशिनः उत्तरतोदृश्यंतेत्रयःसुभिक्षावहाःशिखिनः १४ ब्रह्म

सुतएककएवत्रिशिखोवर्णैस्त्रिभिर्युगांतकरः अनियतदिक्संभवोविज्ञेयोब्रह्मदंडा

ख्यः १५ शतमभिहितमेकसमेतमेतदेकेनविरहितान्यस्मात् कथयिष्येकेतूनांश

तानिनवलक्षणैः १६ सौम्येशान्त्योरुद्रंशुकसुताःधांतिचतुरधीत्याख्याः विपुलसि



स्पष्टैः १

प्रागर्द्धरात्रे दृश्यो याम्याग्रः श्वेतकेतुरूपश्च क इति युगाकृतिरपरे युगपत्तौ सप्तदिन दृ
श्यौ ३७ स्निग्धौ सुभिक्षशुभदावथाधिकं दृश्यते कनामा यो दशवर्षाण्युपतापयं जनयति श
स्त्रप्रकोपकृतं ३८ श्वेत इति जटाकारो रूक्षः श्यावो वियत्त्रिभागगतिः विनिवर्त्तते ऽपस
व्यं त्रिभागशेषाः प्रजाः कुरुते ३९ आधूम्रया तु शिखया दर्शनमायाति कासंस्थः सरस्मि
केतुः श्वेतसमानं फलं धत्ते ४० ध्रुवकेतुरनियतगतिः प्रमाणवर्णाकृतिर्भवति विष्वक्
दिव्यांतरिक्षभौमो भवत्ययं स्निग्धः इष्टफलः ४१ सेनांगेषु नृपाणां गृहतरुशैलेषु
चापि देशानां गृहिणामुपस्करेषु च विनाशनं दर्शनमुपैति ४२ कुमदकांतिर्वारुण्यां प्रा
क्शिखो निशामेकां दृष्टः सुभिक्षमतुलं दशाकिल वर्षाणि स करोति ४३ सकृदेकया
म दृश्यः सुसूक्ष्मतारोऽपरेण मणिकेतुः ऋज्वी शिखास्य शुक्ला स्तनोत्थता क्षीरधारवत्
४४ उदयन्नेव सुभिक्षं चतुरो मासान् करोत्यसौ सार्द्धान् प्रादुर्भावं प्रायः करोति क्षुद्रजंतू
नां ४५ जलकेतुरपि च पश्चात्स्निग्धशिखया परेण चोन्नतया नवमासान् स सुभिक्षं करो

ग्रा ३

ति: कालसुता: कबंधसंज्ञा: कबंधसंस्थाना: पुंड्रभयप्रदा: सुविरूपताराश्चैते शिखि
न: २७ शुक्लविपुलैकतारा नव विदिशाकेतव: समुत्पन्ना: एवं केतुसहस्रं विशेषमे
षामतो वक्ष्ये २८ उदयंतो महान् स्निग्धमूर्तिरपरोदयी वसाकेतु: सद्य: करोति मरकं
सुभिक्षमप्युत्तमं कुरुते २९ तल्लक्षणोऽस्थिकेतु: स तु रूक्ष: क्षुद्भयावह: प्रोक्त: स्निग्ध
स्तद्वत्प्राच्यां शस्त्राख्योऽडमरकाय ३० दृश्योऽमावास्यायां कपालकेतु: सधूम्ररश्मिशि
ख: प्राग्नभसोऽर्द्धविचारी क्षुन्मरकावृष्टिरोगकर: ३१ प्राग्वैश्वानरमार्गे शूलाग्रश्यावरूक्षता
म्रार्चि: नभस्त्रिभागगामी रौद्र इति कपालतुल्यफल: ३२ अपरस्यां चलकेतु: शिखया या
म्याग्रयांगुलोच्छ्रितया गच्छेद्यथा यथोदक् तथा तथा दैर्घ्यमायाति ३३ सप्तमुनीन् संस्पृश्य
ध्रुवमभिजितमेव च प्रतिनिवृत्त: नभसोऽर्द्धमात्रमित्वा याम्येनास्तं समुपयाति ३४ हन्यात्प्र
यागकूलाद्यावदवन्तीं च पुष्करारण्यं उदगपि देविकामपि भूयिष्ठं मध्यदेशाख्यं ३५ अन्या
नपि च स देशान् क्वचिच्च हन्ति रोगदुर्भिक्षै: दशमासान् फलपाकोऽस्य कैश्चिदष्टादशप्रोक्त: ३६



कचित् २ दृष्टा १

२६

सावित्रेदंडकाधिपतिं ५६ चित्रासुकुरुक्षेत्राविधस्यमरणंसमादिसेत्प्राज्ञः काश्मीरक
कांबोजौनृपतीग्राभजनेनस्तः ५७ इक्ष्वाकुरलकनाथश्चहन्यतेयदिभवेद्विशाखासु मै
त्रेयौंड्राधिपतिंज्येष्टास्वथसार्वभौमवधः ५८ मूलेंध्रमद्रकपतिर्जलदेवेकाशिपोमरमे
ति यौधेयकार्जुनायनशिविचैद्यान्वैश्वदेवेच ५९ हन्यात्कैकयनाथंपांचनदंसिंहलाधि
पंवांगं नैमिषनृपंकिरातंश्रवणादिषुक्रमाक्रमशः ६० उल्काभिताडितशिखः शिखीशि
वतरोभिहृष्टोयः अशुभः सएवचोलाख्यकाशिवल्लवीनानां ६१ नमायताशिखिशिखा
भिस्तायतोवाकुक्षंचयस्यशातितकथितांश्चदेशान् दिव्यप्रभावनिहतान् संयथागरु
त्मान् भुंक्तेगतोनपैरेतिः परभोगिभोगान् ६२ दृष्टः षोडशवासरान्नमुदः कैश्चित्सवि
षःशिखीसर्वारंभफलप्रदोहिनयतत्रैत्रेयवामाधवे ऋक्षंयत्परिभुक्तपीडितहतंदग्धं
शिखाभिर्हतंतत्सर्वंपरिकल्प्यशुद्धमपरंपाणिग्रहेवास्तुषु ६३ इत्याचार्यश्रीवराहमि
हरसंहितायांकेतुचारोनामएकादशमोध्यायः ११ भानोर्वर्त्मविघातवद्धसिखरोविंध्या

२६

सिंहपुच्छसदृशया

त्रिशांतिं च लोकानां ४६ भवकेतुरेकरात्रं दृश्यः प्राक् सूक्ष्मतारकः स्निग्धः हरिलांगू
लोयमया वृद्दक्षिणावर्त्तया शिखया ४७ यावंतरावं मुहूर्त्तान् दर्शनमायाति निर्दिशेन्मा
यदिस्निग्धः
सान् तावदतुलं सुभिक्षं रूक्षे प्राणांतिकान् रोगान् ४८ आवर्त्त इति निशार्द्धे सव्य शिखो
रुण निभोपरे स्निग्धः यावत्क्षणान्स दृश्यस्तावन्मासान् सुभिक्षकरः ४९ अपरेणपद्मके
तुर्मृणालगौरो भवेन्निशामेकां सप्तकरोति सुभिक्षं वर्षाण्येतिहर्षयुक्तानि ५० पश्चात्संध्या
काले संवर्त्तो नाम धूम्रताम्रशिखः आक्रम्य वियत्त्र्यंशं शूलाग्रावस्थितो रौद्रः ५१ यावंत
एवं मुहूर्त्तान् दृश्यो वर्षाणि हंति तावंति भूपान् शस्त्रनिपातै रुदयक्षं चापि पीडयति ५२
येशास्तास्तान् हित्वा केतुभिरां धूमितेप्यवास्पृष्टे नक्षत्रे भवति बाधो येषां राज्ञां प्रवक्ष्ये ता
न् ५३ अश्विन्यामश्मकपं भरण्यां सु किरातपार्थिवं हन्यात् बहुलासु कलिंगेशं रोहिण्यां
शूरसेनपतिं ५४ उशीनरमपि सौम्ये जलजाजीवाधिपं तथार्द्रासु आदित्येश्मकनाथं पुष्ये
मगधाधिपं हंति ५५ असिकेशं भौजंगे पित्र्ये गं पांड्यनाथमपि भाग्ये उज्जयिनिकमार्यम्णो

शी२

२७ शानुसारि द्विरेफावनीनोत्तमांगैः कृतान् बाणपुष्पै रिवोत्तंसकान् धारयद्भिर्मृगेंद्रैः सना
थीकृतांतर्दृ निर्झरं गगनतलमिवोल्लिखंतं प्र व देवागंजाकृष्टफुल्लद्रुमत्रासविभ्रांतम
